CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 3
Shelf 3
5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लैवर
६१

१६८५४

अव[illegible] काव्य चेदैस अनभिमतं प्रतियोगिकौ [illegible] [illegible] न [illegible]
पारत्पि [illegible] ताभाव समाना विकरण [illegible] पो [illegible] कत्वस माचेरा
अनुयोगिता प्राप्त योगिता च्छेद [illegible] तिव च्छेदकत्व अभावा भाववत्त्व संबन्धात्वम् ॥

मुक्तावली
पत्र —— १००
ग्रंथसंख्या १५००

मू. २५/-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनकराज १९५३।

मु. १ श्रीगणेशाय नमः॥ ॥चूडामणीकृतविधुर्वलयीकृतवासुकिः। भवो भवतु भव्याय लीलाताण्डव
पण्डितः॥ १॥ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः। विशदीकरवाणि कौतुकान्न
नु राजीवदयावशंवदः॥ २॥ सद्द्रव्यागुणगुंफिता सुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनि
त्यमिलिताभावप्रकर्षोज्ज्वला। विश्वेश्वरविश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यासमनसो मुदं
वितनुतां सद्युक्तिरेषा चिरम्॥ ३॥ विघ्नविघातायकृतं मंगलं शिष्यशिक्षायै निबध्नाति। नूतनेत्यादिना
नूतनजलधररुचये गोपवधूटीदुकूलचौराय। तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥ १॥ ननु मंगलं मु. १
न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्। विनापि मंगलं नास्तिकादिग्रन्थे निर्विघ्नपरिसमाप्तिदर्शं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



नादिति चेन्न। अविगीतशिष्टाचारविषयत्वेन मंगलस्य सफलत्वे सिद्धे तत्र फलजिज्ञासायां संभव
ति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात्। उपस्थितत्वात् समाप्तिरेव फलं कल्प्यते। इ
त्थं च यत्र मंगलं न दृश्यते तत्रापि जन्मांतरीयं तत्कल्प्यते। यत्र च सत्यपि मंगले समाप्तिर्न दृश्यते तत्र
बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्। प्रचुरस्यैव बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यम्॥ विघ्न
ध्वंसस्तु मंगलस्य द्वारमित्याहुः। नव्यास्तु विघ्नध्वंस एव मंगलस्य फलं समाप्तिस्तु बुद्धिप्रतिभादिकार
[redacted]कलापात्। न चैवं स्वतः सिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यम्॥ इष्टाप
त्तेः। विघ्नशंकया तदाचरणात्। तथैव शिष्टाचारात्। न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यम्। सति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नु.
२

विघ्नेनन्नाशस्यैववेदबोधितत्वात्। अतएवपापक्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेपि न तद्बोधकवेदाप्रा
माण्यम्॥ मंगलंच विघ्नध्वंसविशेषे कारणं। विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः। क्वचिच्च विघ्नात्यं
ताभावएव समाप्तिसाधनम्॥ प्रतिबन्धकसंसर्गाभावस्य कार्यजनकत्वात्॥ इत्थं च नास्तिकादिग्रंथेषु
जन्मांतरीयमंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावो वास्तीति न व्यभिचार इत्याहुः। संसारम
हीरुहस्यबीजायेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः। एतेनेश्वरे प्रमाणं द
र्शितम्। तथाहि। यथा घटादिकार्यं कर्तृजन्यं [illegible]। तथा क्षित्यंकुरादिकमपि न च तत्कर्तृत्वमस्मदा राम:
दीनां संभवति अतस्तत्कर्तृत्वेनेश्वरसिद्धिः। न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वा २

क्षित्यंकुरादिकं सकर्तृकं कार्यत्वात् घटवत्.१

नतेषांभावत्वेन ४

अ २ पदार्थान्वभजतेर

च्यम्॥ अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्य्यत्वेन कार्य्यकारणभाव एव अनुकूलस्तर्कः। द्यावाभूमी ज(
नयन्देव एकः। विश्वस्य गोप्ता भुवनस्य कर्त्ता इत्यादय आगमा अप्यत्र संधेयाः॥ द्रव्यं गुणा इत्यादि। द्रव्यं गुणास्तथा
कर्मसामान्यं सविशेषकम्। समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः। सप्तमस्याभावत्वकथनादेवष
ण्णां भावत्वं प्राप्तं तैः पृथग् उपन्यासो न कृतः। एतेव पदार्था। वैशेषिकनये प्रसिद्धाः। नैयायिकानामप्यविरु
द्धाः प्रतिपादितं चैवमेव भाष्ये। अत एव उपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्ययोरप्य
तिरिक्तपदार्थत्वमाशंकितम्। ननु कथमेत एव पदार्थाः। शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात्। त
था हि। मण्यादिसमवहितेन वह्निना दाहो न जन्यते। तच्छून्येन तु जन्यते तत्र मण्यादिना वह्नेर्दाहानुकूला

मु· २ शक्तिर्नाश्यते॥ उत्तेजकेन मण्याद्यपसारणेन च तत्र जन्यत इति कल्प्यते॥ एवं सादृश्यमतिरिक्तः पदार्थः।
तच्छिन्नषट्सु भावेष्वन्तर्भवति। सामान्येपि सत्वात्। यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः।
नाप्यभावे। सत्वेन प्रतीयमानत्वादिति चेन्न। मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्यभावा
देरेव वा स्वातन्त्र्येण हेतुत्वात्। अनेनैव सामञ्जस्ये अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात्॥
न चोत्तेजके सति प्रतिबन्धकसद्भावेपि कथं दाह इति वाच्यम्। उत्तेजकाभावविशिष्टमण्यभावस्य का
रणत्वात्। सादृश्यमपि न पदार्थान्तरं। किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे रामः
सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति। द्रव्याणि विभजते। क्षित्यविति। क्षित्यप्तेजो मरु २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रव्याणि

काल समय दिक् आग्गा

व्योमकालदिग्देहिनो मनः॥ क्षितिः पृथिवी अपोजलानि तेजो वह्निः मरुद्वायुः व्योम आकाशम् देही आत्मा (मन:)
एतानि नवद्रव्याणीत्यर्थः। ननु द्रव्यत्वजातौ किं प्रमाणम्॥ नहि तत्र प्रत्यक्षं प्रमाणम्। घृतजतुतेजःप्रभृति
षु द्रव्यत्वाग्रहादिति चेन्न। कार्य्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकार
णतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति। ननु दशमं द्रव्यं तमः कुतो नोक्तम्। तद्धि प्रत्यक्षेण गृह्यते तस्य
च रूपवत्वात् कर्मवत्वाच्च द्रव्यत्वम्। तद्धि गन्धशून्यत्वान्न पृथिवी नीलरूपत्वान्न जलादिकम्। तत्प्रत्यक्षे
चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न। आवश्यकतेजोभावेनोपपन्नौ द्रव्यान्तरकल्पनायाअन्याय्य
त्वात्। रूपवत्ताप्रतीतिस्तु भ्रमरूपा कर्मवत्ताप्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तिर्वा। तमसोति
ंर्१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
४

रिक्तद्रव्यत्वेअनन्तावयवादिकल्पनानागौरवंचस्यात्॥ सुवर्णस्ययथातेजस्यन्तर्भावस्तथावक्ष्यते॥ गुणान्वि
भजतेअथगुणाइति॥ ॥ अथगुणारूपंरसोगन्धस्ततःपरम्॥ २॥ स्पर्शःसंख्यापरिमितिःपृथक्त्वंचततःप
रम्॥ संयोगश्चविभागश्चपरत्वंचापरत्वकम्॥ ४ ॥ बुद्धिःसुखंदुःखमिच्छाद्वेषोयत्नोगुरुत्वकम्॥ द्रवत्वंस्ने
हसंस्कारावदृष्टंशब्दएवच॥ ५॥ एतेगुणाश्चतुर्विंशतिसंख्याकाःकणादेनकंठतश्चशब्देनदर्शिताः॥ तत्र
गुणत्वजातिसिद्धिस्त्वग्रेवक्ष्यते॥ कर्माणिविभजते। उत्क्षेपणमिति। उत्क्षेपणान्ता।तोपक्षेपणमाकुंचनं
तथा॥ प्रसारणंचगमनंकर्माण्येतानिपंचच॥ ६॥ कर्मत्वजातिस्तुप्रत्यक्षसिद्धा। एवमुत्क्षेपणत्वादिकम रामः
पि॥ ननुभ्रमणादिकमपिकर्माधिकतयाकुतोनोक्तमतआह॥ भ्रमणंरेचनंस्पंदनोर्ध्वज्वलनमेवच। तिर्य्य ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वसमानाधि

स्वसमानाधिकरणाभावप्रतियोगिजातिमन्निष्ठाभावप्रतियोगित्वम्

गमनमप्यत्रगमनादेवलभ्यते॥ ७ ॥सामान्यंनिरूपयति।सामान्यमिति।सामान्यंद्विविधंप्रोक्तंपरंचा
परमेवच।तल्लक्षणं[illegible]न्तु।नित्यत्वेसत्यनेकसमवेतत्वम्।अनेकसमवेतत्वंसंयोगादीनामप्यस्त्यतउ
क्तंनित्यत्वेसतीति।नित्यत्वेसतिसमवेतत्वंगगनपरिमाणादीनामप्यस्त्यतउक्तम्॥अनेकेति।नित्य
त्वेसत्यनेकवृत्तित्वमत्यंताभावस्याप्यस्त्यतोवृत्तिसामान्यंविहायसमवेतेत्युक्तम्॥एकमात्रव्यक्तिवृत्ति ते ४
स्तुनजातिः॥तथाचोक्तम्।व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः।रूपहानिरसंबन्धोजातिबाधक
संग्रहइति।द्रव्यादित्रिकवृत्तिस्तुसत्तापरतयोच्यते॥ ८ ॥परभिन्नातुयाजातिःसैवापरतयोच्यते॥द्रव्य
त्वादिकजातिस्तुपरापरतयोच्यते॥ ९ ॥परत्वमधिकदेशवृत्तित्वम्।अपरत्वमल्पदेशवृत्तित्वम्।सक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु
५

त्वजात्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्सत्तायाः परत्वम् । तदपेक्षया ऽन्यासां जातीनामपरत्वम्
॥ ननु एकस्यैव व्याप्यत्वं व्यापकत्वं कथमित्यत आह ॥ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च । पृथि
वीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वाद्द्रव्यत्वस्य परत्वम् ॥ सत्तापेक्षया ऽल्पदेशवृत्तित्वाद्व्या
प्यत्वाद्द्रव्यत्वस्यापरत्वम् । विशेषं निरूपयति ॥ अन्त्येति ॥ अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०
अन्ते ऽवसाने वर्त्तत इत्यन्त्यः ॥ यदपेक्षया विशेषो नास्तीत्यर्थः । घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवा
दिभेदात्परस्परम्भेदः ॥ परमाणूनां परस्परं भेदको विशेष एव ॥ स तु स्वत एव व्यावृत्तः । तेन विशेषान्तरा
पेक्षा नास्तीति भावः ॥ समवायं दर्शयति ॥ घटादीनामिति । घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ॥

न्यो ३ तत्र २

रामः
५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषुजातेश्चसंबंधःसमवायःप्रकीर्तितः॥ ११ ॥अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोःक्रियाक्रि
यावतोर्नित्यद्रव्यविशेषयोश्चयःसंबन्धःससमवायः॥समवायत्वंनित्यसंबन्धत्वम्।तत्रप्रमाणंतु
गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषयाविशिष्टबुद्धित्वात्दण्डीपुरुषइतिविशि
ष्टबुद्धिवदित्यनुमानेनसंयोगादिबाधादेकसमवायसिद्धिः॥नचस्वरूपसम्बन्धेनैवसिद्धसाधनम
र्थान्तरंवा।अनन्तस्वरूपाणांसंबंधत्वकल्पनेगौरवात्।लाघवादेकसमवायसिद्धिः।नचसमवाय
स्यैकत्वेवायौरूपवत्ताबुद्धिप्रसंगः।तत्ररूपसमवायत्वेपिरूपाभावात्।नचैवमभावस्यापिवैशि
ष्ट्यंसंबंधांतरंसिद्ध्येदितिवाच्यम्।तस्यनित्यत्वेभूतलेघटानयनानन्तरमपिघटाभावबुद्धिप्रसंगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु· त॥घटाभावस्य च तत्र सत्वात्।तस्य नित्यत्वात्॥अन्यथा देशान्तरेऽपि तस्य प्रतीतिर्न स्यात्।वैशिष्ट्यस्य च तत्र स
९ त्वात्।मम तु घटे पाकरक्तदशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः।वैशिष्ट्यस्यानित्यत्वे त्वनन्त वै
तवैव ३ शिष्ट्यकल्पने गौरवम्।इत्थं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां संबंधः॥अभावं विभजते।
अभावस्त्विति।अभावस्तु द्विधान्योन्यसंसर्गाभावभेदतः।अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्।सं
र्गाभावान्योन्याभावभेदादित्यर्थः।अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात् संसर्गाभावं विभज
ते॥ ॥प्रागभावेति॥प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च॥२॥ एवं त्रैविध्यमापन्नः संसर्गाभाव इ राम:
ष्यते॥संसर्गाभावत्वम्‌न्याभावभिन्नाभावत्वम्॥अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिता ९

न्यो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काभाववत्त्वम्। विनाश्यभाववत्त्वं प्रागभाववत्त्वम्। जन्याभाववत्त्वं ध्वंसत्वम्। नित्यसंसर्गाभाववत्त्वमत्यन्ताभा
ववत्त्वं यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य संबंधाघटकत्वादत्यन्ता
भावस्यानित्यत्वेऽपि घटकालेन घटात्यन्ताभावबुद्धिः। तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति के
चित्। अत्र ध्वंसप्रागभावाधिकरणे नात्यन्ताभावबुद्धिरिति प्राचां मतम्। श्यामघटे रक्तो नास्ति रक्ते घटे
श्यामो नास्तीति धीः प्रागभावध्वंसं चावगाहते न तु तदत्यन्ताभावम्॥ नव्यास्तु। तत्र विरोधे मानाभावा
त्॥ ध्वंसादिकालावच्छेदेनात्यन्ताभावो वर्त्तत इत्याहुः। नन्वेवमभावानामधिकरणात्मकत्वं लाघवादि
ति चेन्न। अनन्ताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तकल्पनाया एव लघीयस्त्वात्। एवं चारोधो

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु. ८

धेयभावोप्युपपद्यते॥एवंचतन्नद्भूदगन्धरसाद्यभावानांप्रत्यक्षत्वमुपपद्यते॥अन्यथातत्तदधिकरणानां
तत्तदिन्द्रियाग्राह्यत्वात्प्रत्यक्षत्वन्नस्यात्॥एतेनज्ञानविशेषकालविशेषात्मकत्वमभावस्येतिप्रत्युक्तं
।अप्रत्यक्षत्वापत्तेः।इदानींपदार्थानांसाधर्म्यवैधर्म्यवक्तुमुपक्रमते।सप्तानामिति॥सप्तानामपिसा
धर्म्यज्ञेयत्वादिकमुच्यते॥ १३ ॥समानोधर्मोयेषांतेसधर्माणस्तेषांभावःसाधर्म्यसमानोधर्मइतिफ
लितार्थः।एवंविरुद्धोधर्मोयेषांतेविधर्माणस्तेषांभावोवैधर्म्यविरुद्धोधर्मइतिफलितार्थः॥ज्ञेयत्वंज्ञा
नविषयतासाचसर्वत्रैवास्ति।ईश्वरज्ञानविषयतायाःकेवलान्वयित्वात्।एवमभिधेयत्वप्रमेयत्वा
दिकंवोध्यम्॥द्रव्यादयःपंचभावाअनेकेसमवायिनः।द्रव्यगुणासामान्यविशेषाणांसाधर्म्यमनेक एमः ८

कर्म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वंसमवायित्वंच। यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वेसतिभाववत्वम्। तथाचानेकत्वंअनेकभाव
वृत्तिपदार्थविभाजकोपाधिमत्वंफलितार्थः तेनघटत्वेकंघटादौनाव्याप्तिः॥ समवायित्वंसमवायसंबं
धेनसंबंधित्वंनतुसमवायवत्वंसामान्यादावभावात्॥ सत्तावत्वंत्रयाणांद्रव्यगुणकर्मणां॥ स
त्प ४ त्तावत्वमित्यर्थः॥ गुणादिर्निर्गुणक्रियः। यद्यपिगुणक्रियाशून्यत्वमाद्यक्षणेघटादावतिव्याप्तंक्रिया
शून्यत्वंगगनादावतिव्याप्तंतथापिगुणवद्वृत्तिधर्मवत्वंकर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्वं
फलितोर्थः। नहिघटत्वादिकंद्रव्यत्वंवागुणवद्वृत्ति [redacted] कर्मवद्वृत्तिर्वा किन्तुगुणत्वादिकं
तथा॥ आकाशादिकंतुनपदार्थविभाजकोपाधिः॥ सामान्यपरिहीनास्तुसर्वेजात्यादयोमताः॥ सामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

ज्ञातधर्मेतर भावकार्यं प्रति पारिमाण्डल्य परममहत्परिमाणभिन्नानां साधर्म्यम्॰

मु॰ मानधिकरणत्वं सामान्यादीनामित्यर्थः। पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥१५॥ पारिमाण्डल्य
मणुपरिमाणम्॥ कारणं तद्भिन्नानामित्यर्थः। अणुपरिमाणं तु न कस्यापि कारणम्॥ तद्धि स्वाश्रयारब्ध
द्रव्यपरिमाणारम्भकं भवेत्तच्च न सम्भवति। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वा
त्। महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसंगात्। एवं परममहत्परि माणमतीन्द्रियं
सामान्यविशेषाश्चबोध्याः। आत्ममानसप्रत्यक्षे परममहत्त्वस्य कारणत्वात्॥ परममहत्परिमाणमाका मु॰ ५
शादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशयः इत्यन्ये। तच्च ज्ञानातिरिक्तं प्रत्यकारणतायाए राम:
वाचार्यैरुक्तत्वात्। इदमपि योगिप्रत्यक्षविषयस्य न कारणत्वं ज्ञायमानं सामान्यं प्रत्यासत्तिः ज्ञायमा ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं लिंगं नानुमितिकरणमित्यभिप्रायेण ॥ ननु कारणत्वं किमत आह ॥ अन्यथेति ॥ अन्यथासिद्धिशू
न्यस्य नियतापूर्ववर्तिता । कारणत्वम्भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ समवायिकारणत्वं ज्ञेयम
थाप्यसमवायिहेतुत्वम् ॥ एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥ यत्समवेतं कार्यं भ
वति ज्ञेयं तु समवायिजनकं तत् ॥ तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥ अस्य का
रणत्वस्यात्तत्रेति समवायि कारणे प्रत्यासन्नं द्वितीयमसमवायिकारणमित्यर्थः । अवयवयपितुरीतन्तु
संयोगस्य पटासमवायिकारणत्वं स्यात् । एवमवेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात् ॥
एवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात् ॥ तथापि समवायिकारणलक्षणे तुरीतन्तुसंयोग



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



भिन्नत्वं देयम्॥ तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणं भवत्येव॥ एवमवेगादीनां स्पं
दनाद्यसमवायिकारणत्वं भवत्येवेति॥ तन्न कार्य्यासमवायिकारणलक्षणे। तत्र तद्भिन्नत्वं
देयमेव॥ आत्मविशेषगुणानामकुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यल
क्षणे देयमेव॥ असमवायिकारणे प्रत्यासन्नं द्विविधम्॥ कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्या
सत्त्या च॥ आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं समवायिकारणं स्वकार्य्येण घटेन सह ए
कस्मिन् कपाले प्रत्यासन्नमस्ति। द्वितीयं यथा। घटरूपं प्रति कपालरूपमसमवायिकारणम्॥ तत्र रामः
घटरूपं प्रति कारणं घटस्तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासन्नमस्ति॥ तथा च॥ क्वचित्समवाय १२



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्धर्मावच्छिन्ननिरूपितं नियतपूर्ववर्त्तित्वं आमशीय यच्छिन्नो यतावच्छेदकत्वेसति स्वतन्त्रान्वा
न्वयव्यतिरेकशून्यत्वम्

समवायत्वेन क्वचित्स्वसमवायिसमवेतसमवेतत्वेनेति फलितोर्थः॥ ॥इत्यन्तं॥ कार्य्यैकार्थकार
णैकार्थान्यतरप्रत्यासत्त्याकारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यतो लक्षणं पर्य्यवसितं
आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं तृतीयन्निमित्तकारणमित्यर्थः॥ इदानीमन्यथा
सिद्धत्वमेव कियत्तान्तदाह॥ येनेत्यादिना॥ येन सह पूर्वभावः॥ यत्कार्य्यं प्रति यत्कारणस्य पूर्ववर्तित्वा ये
न रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपं अन्यथासिद्धमित्यर्थः॥ यथा घटं प्रति दण्डत्वं [redacted]॥ द्वितीयमन्यथासि
द्धमाह॥ कारणमिति॥ कारणमादाय वा यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः॥ किन्तु कारणमादायैवान्व
न्वयव्यतिरेकौ गृह्येते तं प्रति तदन्यथासिद्धम्॥ यथा घटं प्रति दण्डरूपम्॥ तृतीयमाह॥ अन्यं प्रतीति॥ अ

पृष्ठ २

स्वातन्त्र्येणयत्कार्यनिरूपितान्वयव्यतिरेकशून्यत्वेसति तत्कार्यकारणावच्छि
न्नस्वनिष्ठतत्कार्यनिरूपितनियतपूर्ववर्तित्वग्रहविशेष्यता इत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु॰ १०

संप्रतिपूर्वभावेज्ञातेयत्पूर्वभावविज्ञानम्॥ १२ ॥अस्यंप्रतिपूर्ववृत्तित्वंगृहीत्वैवयस्ययत्कार्य्यंप्रतिपूर्ववृ
त्तित्वंगृह्यतेतस्यतत्कार्य्यंप्रत्यन्यथासिद्धत्वम्॥ यथाघटादिकम्प्रत्याकाशस्यआकाशस्यहिघटादिकंप्र
तिकारणत्वआकाशत्वेनस्यात्॥आकाशत्वंशब्दसमवायिकारणत्वम्॥अतस्वशब्दंप्रतिजनकत्वंगृही
त्वैवघटादिकंप्रतिजनकत्वंग्राह्यम्॥ अतस्तदन्यथासिद्धम्॥ शब्दाश्रयत्वेनतस्यकारणत्वेकान्यथा
सिद्धिरितिचेत्पंचमीतिगृहाण॥अथाकाशस्यशब्दंप्रतिजनकत्वेकिमवच्छेदकमितिचेत्कवत्वादि
कंविशेषपदार्थोवेति॥ चतुर्थमन्यथासिद्धमाह॥जनकंप्रतीति॥जनकंप्रतिपूर्ववर्तितामपरिज्ञाय राम: १०
नयस्यगृह्यते॥यत्कार्य्यंजनकंप्रतिपूर्ववृत्तित्वंगृहीत्वैवयस्ययत्कार्य्यंप्रतिपूर्ववृत्तित्वंगृह्यतेतस्यतत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्य्यप्रत्यनन्यथासिद्धत्वम्॥ यथा कुलालपितुर्घटं प्रति। तस्य हि कुलालपितृत्वेन घटं प्रतिजनकत्वेऽन्यथा
सिद्धिः। कुलालत्वरूपेण जनकत्वे विशयपत्तिः। कुलालमात्रस्य घटं प्रति जनकत्वात्॥ पंचममन्यथासिद्ध
माह। अतिरिक्तमिति। अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः॥ २०॥ एते पंचान्यथासिद्धादं
डत्वादिकमादिमम्॥ घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥ २१॥ तृतीयन्तु भवेद्व्योम कुलाल जन
कोऽ परः। पंचमो रासभादिः स्यात्। अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्य्यसंभवे तद्भिन्नमन्यथासि
द्धमित्यर्थः। अत एव प्रत्यक्षे महत्त्वं कारणम्। अनेकद्रव्यत्वं अन्यथासिद्धम्॥ तत्र हि महत्त्वमवश्यक्लृप्तम्।
तेनानेकद्रव्यत्वमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्॥ महत्त्वत्वजातेः कारणताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
११ छेदकत्वे लाघवात्॥ यद्यपि तद्घटव्यक्तिं प्रति रासभस्य नियत पूर्ववृत्तित्वमस्ति तथापि घटजातीयं प्र
तिसिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः॥ एतेषिति॥ एतेषाव
श्यकस्त्वसौ॥ २१॥ एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्ध आवश्यकस्तेनैव परेषां चरितार्थत्वा
त्॥ तथाहि॥ दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्त्तिभिरेव कार्य्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्॥ न
च वैपरीत्ये किं विनिगमकमिति वाच्यम्॥ दण्डत्वस्य कारणत्वे दण्डघटितपरंपरायाः संबंधत्वे गौरवा
त्॥ एवं अन्येषामप्यनेनैव चरितार्थत्वं सम्भवति॥ समवायिकारणत्वमिति॥ समवायिकारणत्वं द्रव्यस्यै रामः
वेति विज्ञेयम्॥ गुणकर्मेति॥ गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्॥ २२॥ असमवायि कारण ११

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं गुणकर्मभिन्नानां वैधर्म्यं। ननु गुणकर्मणोः साधर्म्यमत्रापि तात्पर्यम्। अथवा ऽसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्वं तदर्थः। तेन ज्ञानादीनामसमवायिकारणत्वविरहेपि न क्षतिः। अन्यत्रेति। अन्यत्र नित्यद्रव्येभ्यः आश्रितत्वमिहोच्यते॥ नित्यद्रव्याणि परमाण्वाकाशादीनि विहाय आश्रितत्वम्। साधर्म्यमित्यर्थः आश्रितत्वं समवायादिसंबंधेन वृत्तिमत्वम्। ननु वृत्तिमत्वमात्रम्। विशेषणतया नित्यानामपि कालादौ वृत्तेः। इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुं प्रक्रमते। क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता॥ २४ ॥ क्षित्यादीनामिति॥ क्षितिर्जलं तथा तेजः पवनो मन एव च॥ परापरत्वमूर्तत्वक्रियावेगाश्रया अमी॥ २५ ॥ क्षितिरिति पृथिव्यप्तेजोवायुमनसां परत्वमपरत्वं मूर्तत्वं कर्मवत्वं वेगवत्वं च साधर्म्यम्॥ नव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त॰
१२

यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्। परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजा
तिमत्त्वस्य विवक्षितत्वात्। मूर्तत्वं अपकृष्टपरिमाणवत्त्वं तच्चैतेषामेव। गगनादिपरिमाणस्योत्कृष्टतोऽप्य
पकृष्टत्वाभावात्। पूर्ववत्कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं। वेगवद्वृत्तिद्रव्यत्वव्या
प्यजातिमत्त्वं वोध्यम्॥ कालेति॥ कालखात्मदिशां सर्वगतत्वं परममहत्त्व। कालाकाशात्मदिशां सर्वग
तत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च॥ परममहत्त्वं जातिविशेषः॥ अपकर्षानाश्रयपरिमाणत्वं वा॥
क्षित्यादीति॥ क्षित्यादि पंचभूतानि। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च वहिरिंद्रियग्राह्यविशेषगुणा | एकः
वत्त्वम्॥ अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं वोध्यम्। तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्योपनीत | १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मान विषयत्वान्नवत्त्वात्मनि नातिव्याप्तिः। नवाप्रत्यक्षाविषयरूपादिमतिपरमाण्वादावव्याप्तिः।
तस्यापि स्वरूपयोग्यत्वान्महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम्॥ अथवा आत्मावृत्तिवि
शेषगुणवत्त्वं तत्त्वम्॥ चत्वारीति॥ चत्वारि स्पर्शवन्ति हि॥ २८॥ पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम्॥ द्र
व्यारम्भेति॥ द्रव्यारम्भश्चतुर्षु स्यात्॥ पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भः स्यादित्यर्थः। न च द्व्यानारंभके
घटादावव्याप्तिः। द्रव्यसमवायि कारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ अथेति॥ अथा
काशशरीरिणाम्॥ अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते॥ आकाशात्मनां अव्याप्यवृत्तिक्षणिकवि
शेषगुणवत्त्वं तथाहि। आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः। यदा किंचिदवच्छेदेन शब्द उत्पद्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यु. १२

तदःन्यावच्छेदेनतदभावस्यापिसत्वात्॥क्षणिकत्वंचतृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्।योग्यविशु
विशेषगुणानांस्वोत्तरवर्त्तिगुणनाश्यत्वात्॥प्रथमशब्दस्यद्वितीयशब्देननाशः।एवंज्ञानादीनामपि
।ज्ञानादिकंहिआत्मनिविभौशरीरावच्छेदेनोत्पद्यते॥॥घवच्छेदेनतदभावोऽस्त्येव।एवंज्ञानादिकमपि
क्षणद्वयस्थायि।इत्थंवाव्याप्यवृत्तिविशेषगुणवत्त्वंक्षणिकविशेषगुणवत्त्वंवार्थः।पृथिव्यादौरूपा
दिर्विशेषगुणोऽस्तीतिविशेषगुणवत्त्वंक्षणिकविशेषगुणवत्त्वंवार्थः।पृथिव्यादौरूपादिर्विशेषगुणो
ऽस्तीतिअव्याप्यवृत्तीत्युक्तम्॥पृथिव्यादौअव्याप्यवृत्तिःसंयोगादिरस्तीतिविशेषगुणेत्युक्तम्।नचरूपा
दीनामपिकदाचित्तृतीयक्षणेनाशसम्भवात्।क्षणिकविशेषगुणवत्त्वंक्षित्यादावतिव्याप्तमितिवाच्यम्। एनः १२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



चतुःक्षणवृत्तिजन्यवृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतु
ष्टयं तु न किमपि ज्ञानादिकं तिष्ठति। रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तद्व्युदासः
। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात्॥ ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम्। यदि आकाशजीवात्मनोः साधर्म्यं
तदाजन्येति न देयम्। द्वेषत्वादिकमादाय लक्षणसमन्वयात्। परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणो
द्वित्वादीनां नाशाभ्युपगमात्। द्वित्वादीनामपि तथात्वात्। तद्वारणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यं
। इच्छात्वादिकमादायात्मनि लक्षणसमन्वयात्। रूपेति। रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमाद्वयः। पृथि
व्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवह्निरूपस्याश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु रूपवत्त्वे किंमानमिति वाच्यम्॥ तत्रापि तेजस्त्वेन रूपानुमानात्॥ एवं वा स्वानीत पृथिवीजलतेजोभागानाम
१८ पि पृथिवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ उद्भूतशुक्लवर्णादिभिन्ने तेजसि चडवत्त्ववत्त्वमव्याप्तमिति
वाच्यम्। उद्भवद्वावृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ घृतजतुप्रभृतिषु पृथिवीषु जलेऽद्भुतशुक्लवर्णा
दि तेजसि चडवत्त्वसत्त्वात्तत्र पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणासमन्वयात्। न च प्रत्यक्षविषयत्वं प
रमाणवादावव्याप्तमतिव्याप्तं च रूपादाविति वाच्यम्। चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्व
स्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति॥ गुरुणीति॥ गुरुणी द्वे रसवती॥ गुरुत्ववत्त्वं रसत्व एक:
वत्त्वं पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वा स्वानीत पार्थिवभागानां च रसादिमत्त्वे किंमानमिति १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



वाच्यम्॥ तत्रापि पृथिवीत्वादिना तदनुमानात्। द्वयोर्नैमित्तिको द्रवः॥ २८ ॥ पृथिवीतेजसोरित्यर्थः। न च
नैमित्तिकद्रवत्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम्। नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्या
प्यजातिमत्त्वस्य विवक्षितत्वात्॥ आत्मान इति॥ आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः॥ २९ ॥ पृथि
व्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति। यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्मा
त्। ज्ञेयत्वादिकं विहायेति वाच्यम्। ननु न कस्यापि वैधर्म्यं केवलान्वयित्वात्॥ स्पर्शादय इति। स्पर्शाद
योऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः। स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः॥ ३० ॥ स्पर्शादयोऽष्टौ वे
गश्च द्रवत्वं च गुरुत्वकम्। रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥ २१ ॥ स्नेहहीना गंधयुताः क्षितावेते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ चतुर्दश॥ बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा॥ ३३ ॥धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश। संख्या
१५ दिपंचकं कालदिशोः शब्दश्च ते च खे॥ ३४ ॥ते च संख्यादयः पंच शब्दश्च खे आकाशे॥ संख्यादयः पंच बुद्धि
रिच्छा यत्नोपि चेश्वरे। परापरत्वे संख्यादि पंच वेगश्च मानसे॥ ३५ ॥साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं
पृथिव्यादिकं निरूपयति॥ तत्र क्षितिरित्यादिना॥ तत्र क्षितिर्गंधहेतुः। गंधसमवायिकारणमित्यर्थः॥ य
द्यपि गन्धवत्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं। तथा
हि। पृथिवीत्वं गन्धसमवायि कारणतावच्छेदकतया सिद्ध्यति॥ अन्यथा। गंधवत्वावच्छिन्नस्याकस्मिकत्वा राम:
पत्तेः। न च पाषाणादौ गंधाभावादृ(?)ध वत्वमव्याप्तमिति वाच्यम॥ तत्रापि गंध[illegible]स्य सत्वात्। अनुपलब्धि १५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



स्त्वनुत्कटत्वेनाप्युपपद्यते। कथमन्यथा तत्र भस्मनि गन्ध उपलभ्यते। भस्मनो हि पाषाणध्वंसजन्यत्वात्पाषा
णोपादानोपादेयत्वं सिध्यति॥ यद्ध्वंसः यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः॥ इत्थं चैतत्तदणुपटे
महापटध्वंसजन्ये॥ इत्थं च पाषाणपरमाणोः पृथिवीत्वात्तज्जन्यपाषाणस्यापि पृथिवीत्वं। तथा च तस्यापि
गंधवत्त्वे बाधकाभावः॥ नानारूपेति। नानारूपवती मता॥ शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामे
व वर्त्तते न तु जलादौ॥ तत्र शुक्लस्यैव सत्त्वात्॥ पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात्
। न च नानारूपं यत्र नोत्प न्नं तत्राव्याप्तिरिति वाच्यम्॥ रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशव
द्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात्॥ वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्वरूपान्तरस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. १८ वसत्वात्॥ न्यायनये घटादावपि तत्सत्वात् तल्लक्षणासमन्वयः॥ षड्विध इति। षड्विधस्तु रसस्तत्र॥ मधुरकटु
कषायादिभेदेन यः षड् विधो रसः स पृथिव्यामेव। जले तु मधुर एव रसः॥ अत्रापि पूर्ववद्रसवद्यावद्वृत्तिद्रव्य
त्वव्याप्यजातिमत्त्वं लक्षणार्थो बोध्यः॥ गंधास्त्विति॥ गंधस्तु द्विविधो मतः॥ २५॥ द्विविध इति वस्तुस्थितिमात्रं मा ४
न तु द्विविधः। गंधवत्त्वमिति लक्षणम्। द्विविधस्य व्यर्थत्वात्॥ द्वैविध्यं सौरभासौरभभेदेन बोध्यम्॥ स्पर्श इति।
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥ तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्त्तत इत्य
धिकस्यैव पर्य्याप्तौ यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व मुक्ताः १८
मित्यर्थो बोध्यः॥ नित्येति। नित्यानित्यत्वसा द्वेधा नित्या स्यादणुलक्षणा॥ २६॥ अनित्या तु तदन्या स्यात् सैवाव

ज्ञेया तै १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यवयोगिनी॥सापृथिवीद्विधा।नित्याअनित्याच।अनुलक्षणापरमाणुलक्षणापृथिवीनित्या॥ ॥तदन्या
परमाणुभिन्नापृथिवीघटकादिसर्वमनित्येत्यर्थः।सैवानित्यापृथिवीअवयवयोगिनीअवयववतीत्यर्थः
तन्नवयविनिकिंमानम्॥परमाणुपुंजैरेवोपपत्तेः।नचपरमाणूनामतीन्द्रियत्वाद्घटादेःप्रत्यक्षत्वंनस्या
दितिवाच्यम्।एकस्यपरमाणोरप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वात्।यथैकस्यकेशस्यदूरेऽप्रत्यक्षत्वे
पितत्समूहस्यप्रत्यक्षत्वम्॥नचएकःस्थूलोघटइतिबुद्धेरनुपपत्तिरितिवाच्यम्।एकोमहान्धान्यराशि
रितिवदुपपत्तेः।नैवंपरमाणोरतीन्द्रियत्वेनतत्समूहस्यापिप्रत्यक्षत्वायोगात्॥दूरस्थकेशस्तुनातीन्द्रि
यःसन्निधानेतस्यैवप्रत्यक्षत्वात्।नचतदानींदृश्यपरमाणुपुंजस्योत्पन्नत्वान्नप्रत्यक्षत्वेपिविरोधइतिवाच्यं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
१८

अदृश्यस्य दृश्यानुपादानत्वात्॥ अन्यथा चक्षुरूपादिसन्नतौ कदाचिद् दृश्यत्वप्रसंगात्। न चानित्यत्र नैत्यादे
कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्॥ तत्रानदनःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्प
त्तेरभ्युपगमात्। न चादृश्येन त्र्यणुकेन कथं दृश्यत्र्यसरेणोरुत्पत्तिरिति वाच्यम्॥ यतो नवयं दृश्यत्वमदृश्यत्वं वा
कस्यचित्स्वभावादेवाचक्ष्महे। परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशात्॥ दृश्यत्वन्तदभावे चादृश्यत्वं
तथा च त्र्यसरेणोर्महत्त्वात्प्रत्यक्षत्वन्तु त्र्यणुकादेस्तदभावात्। नहि त्वन्मतेपीदं सम्भवति परमाणोर्महत्त्वाभा
वात्। इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चा[redacted]वयवधाराया अनन्त
त्वे मेरुसर्षपयोरपि साम्यप्रसंगः अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्राममस्तस्यानित्यत्वे असमवेतकार्योत्प

गु:
१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्प्रसंगः स्यादतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्य
स्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्। त्रसरेणुः
सावयवः चाक्षुषद्रव्यत्वात्। घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महद्द्रव्यारं
भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः। न चेदमप्रयोजकम्। अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्र
योजकत्वात्। न चैवं क्रमेण तदवयवधाराऽपि सिद्ध्येदिति वाच्यम्। अनवस्थाभयेन तदसिद्धेः। सा च त्रिधा
भवेद्देहमिन्द्रियं विषयस्तथा। योनिजादिभवेद्देहमिन्द्रियं घ्राणलक्षणम्। सा कार्यरूपा पृथिवी त्रिविधा श
रीरेन्द्रियविषयभेदादित्यर्थः। तत्र शरीरमाह योनिजादीति। योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
१८

जरायुजमण्डजंच।जरायुजंमानुषादीनाम्।अण्डजंसर्पादीनां।अयोनिजंस्वेदजोद्भिज्जादिकम्।स्वेदजाः
कृमिदंशाद्याः।उद्भिज्जास्तरुगुल्माद्याः।नारकीयंशरीरमप्ययोनिजम्।नचमानुषादिशरीराणांपार्थिव
त्वेकिंमानमितिवाच्यम्।गन्धादिमत्त्वस्यैवप्रमाणत्वात्।नचश्लेष्मादेरुपलम्भादाप्यत्वादिकमपिस्या
दितिवाच्यम्।तथासतिजलत्वपृथिवीत्वादीनांसंकरप्रसंगात्।नचतर्हिजलत्वादिकमेवास्तुनतुपार्थि
वत्वमितिवाच्यम्।क्लेदादीनांविनाशेपिशरीरत्वेनप्रत्यभिज्ञानात्।गन्धाद्युपलब्धेश्चपृथिवीत्वसिद्धेः॥
तेनपार्थिवादिशरीरेजलादीनांनिमित्तत्वमात्रंबोध्यम्।शरीरत्वन्तुनजातिः।पृथिवीत्वादिनासांकर्य्यात् एमः १८
।किन्तुचेष्टाश्रयत्वम्।चेष्टाचहिताहितप्राप्तिपरिहारक्रियानतुस्पन्दमात्रंतथासतिप्रसक्तेर्वृक्षादीनाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

य

पिचेष्टाश्रयत्वान्नाव्याप्तिः।नचवृक्षादेःशरीरत्वेकिंमानमितिवाच्यम्॥आध्यात्मिकवायुसम्बन्धस्यप्रमा
णत्वात्।तत्रैवकिंमानमितिचेत्।भग्नक्षतसंरोहणादिनातदुन्नयनात्॥यदिहस्तादौशरीरव्यवहारो
नभवतितदांत्यावयवित्वेनविशेषणीयम्।नचयत्रशरीरेचेष्टानजातातत्राव्याप्तिरितिवाच्यम्।तादृशे
प्रमाणाभावात्।अथवाचेष्टावदंत्यावयविवृत्तिद्रव्यत्व[illegible]व्याप्यजातिमत्वं।अंत्यावयविमात्रवृत्ति
चेष्टावद्वृत्तिजातिमत्वंवातत्।मानुषत्वचैत्रत्वादिजातिमादायलक्षणसमन्वयः।नचनृसिंहशरीरे
कथंलक्षणसमन्वयस्तत्रनृसिंहत्वस्यैकव्यक्तिवृत्तितयाजातित्वाभावात्।जलीयतैजसशरीरवृत्ति
तयादेवत्वस्यापिजातित्वाभावात्।इतिवाच्यम्।कल्पभेदेननृसिंहशरीरस्यनानात्वेननृसिंहत्वजाता

प्रः १२ लक्षणसमन्वयात्। इंद्रियं घ्राणलक्षणम्। घ्राणेंद्रियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेत्। इत्थं घ्रा
णेंद्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यंजकत्वात्। कुंकुमगंधाभिव्यंजकघृतादिवत्। न च दृष्टान्ते स्वकी
यरूपादिव्यंजकत्वादसिद्धिरिति वाच्यम्। परकीयरूपाद्यव्यंजकत्वस्य तदर्थत्वात्। न च नवशरावगंधव्यं
जकजले नानैकान्तिकमिति वाच्यम्। तस्य सक्तुरसाभिव्यंजकत्वात्। यद्वा परकीयेति न देयम्। वायूपनी
तसुरभिभागस्य दृष्टान्तत्वसंभवात्। न च घ्राणेंद्रियसन्निकर्षस्य गंधमात्रव्यंजकत्वात्तत्र व्यभिचार इति
वाच्यम्। द्रव्यत्वे सतीति विशेषणात्। विषयं दर्शयति। विषय इति। विषयो द्व्यणुकादिब्रह्माण्डान्त उ एमः
दाहृतः॥ ३८॥ उपभोगसाधनं विषयः। सर्वमेव हि कार्य्यं ज्ञानमदृष्टाधीनम्। यद्यत्कार्य्यं तददृष्टाधीनन्त १९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तउपभोगंसाक्षात्परंपरयावाजनयत्येव। नहिवीजद्रयोजनाभ्यांविनाकस्यचिदुत्पत्तिरस्तितेनद्व्यणुका
दिकंब्रह्माण्डान्तंसर्वमेवविषयोभवति। शरीरेन्द्रिययोर्विषयत्वेप्रकारान्तरेणोपन्यासःशिष्यबुद्धिवै
शद्यार्थः। जलंनिरूपयति। वर्णइति। वर्णःशुक्लोरसस्पर्शौजलेमधुरशीतलौ॥ स्नेहसमवायिकारणा
तावच्छेदकतयाजलत्वजातिः सिद्धेति। यद्यपिस्नेहत्वंनित्यानित्यवृत्तितयानकार्य्यतावच्छेदकंत
थापिजन्यस्नेहत्वन्तथाबोध्यम्॥ अथपरमाणौजलत्वन्नस्यात्। तत्रजन्यस्नेहाभावात्। तस्यचनित्यस्य
स्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्न। जन्यस्नेहजनकतावच्छेदकतयाजन्यजलत्वजातेःसि
द्धौतदवच्छिन्नजनकतावच्छेदकतयाजलत्वजातिसिद्धेः॥ शुक्लरूपमेवजलस्येतिदर्शयितुंशुक्लंवर्णःशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि॰ ४१

मु॰ त्लशति। वस्तुस्थिंमात्रं। ननुशुक्लरूपत्वंलक्षणंपृथिव्यादावतिव्याप्तेः। अथवानैमित्तिकद्रवत्ववद्वृत्ति
२० शुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्। अभास्वरशुक्लेतररूपासमानाधिकरणशुक्लरूपवद्वृत्ति
द्रव्यत्वव्याप्यजातिमत्त्वंवातदर्थः। रसस्पर्शाविति। जलस्यमधुरएवरसःशीतएवस्पर्शः। तिक्तवद्वृत्ति
मधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंवार्थः [illegible]ः। शीतेतरस्पर्शवद्वृत्तिना
[illegible]स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंवातदर्थः। ननुजलेशुक्लरूपमेवेतिकुतः कालिन्दीजलादौ
नीलिमोपलब्धेरितिचेन्न। नीलजनकतावच्छेदिकायाःपृथिवीत्वजातेरभावात्। जलेनीलरूपासम्भ
वात्। कालिन्दीजलेनीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अतएववियतिविक्षेपेधवलिमोपलब्धिः। अथज रामः २०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ले माधुर्ये किंमानम्। नहि जलस्य स्वरसः कोपि रसस्तत्रानुभूयते। न च नारिकेलजलादौ माधुर्यमुपलभ्यत
एवेति वाच्यम्॥ तस्याश्रयोपाधिकत्वादन्यथा जंबीरकरवीरादावम्लक्षीरत्वादिमत्त्वमपि स्यादिति चेन्न।
हरीतक्यादिभक्षणास्य जलरसव्यंजकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगाद् रसांतरोपलब्धिरिति
वाच्यम्॥ कल्पनागौरवात्। पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकम्। जंबीररसादौ
त्वाश्रयोपाधिकी तथा प्रतीतिः एवं ज[illegible]शीतस्पर्शजनकतावच्छेदकन स्पा[illegible] जन्यजलत्वं वा बोध्यम्॥
घृष्टचन्दनादौ शैत्योपलब्धिस्तु तदन्तर्वर्तिशीत[illegible] सलिलस्यैव। तेजःसंयोगाज्जलेऔष्ण्यप्रतीतिरौपाधि
की स्फुटैव तत्र पाकासंभवात्। स्नेहस्तत्र[illegible]। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः। जलस्य स्नेहस्समवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु
२१

धिकरणत्वात्।तेनजलएवस्नेहइतिमन्तव्यम्।द्रवत्वंतुसांसिद्धिकमुदाहृतम्।सांसिद्धिकद्रवत्वत्वंजाति
विशेषः।प्रत्यक्षसिद्धस्वद्रवत्वादिजनकतावच्छेदकमपितदेवेतिभावः।तैलादावपिजलस्यैवद्रवत्वम्॥
स्नेहप्रकर्षेणचदहनानुकूल्यमितिवक्ष्यते।नित्यतादिप्रथमवत्।पृथिव्याइवेत्यर्थः।तथाहि।जलंद्विवि
धंनित्यमनित्यंच।परमाणुरूपंनित्यं।द्व्यणुकादिकंसर्वमप्यनित्यम्।अवयवसमवेतंच।अनित्यमपि
त्रिविधंशरीरेंद्रियविषयभेदात्।पृथिवीतोयोर्विशेषमाह।किंत्विति।अयोनिजमेवेत्यर्थः।जलीयं
शरीरमयोनिजम्।वरुणलोकेप्रसिद्धम्।इंद्रियंरसनम्॥जलीयमित्यर्थः।तथाहि।रसनंजलीयंगंधा
द्यव्यंजकत्वेसतिरसव्यंजकत्वात्।सक्तुरसाभिव्यंजकोदकवत्।रसनेंद्रियसंनिकर्षेव्यभिचारवार

३किंतुदेहमयोनिजम्॥३

राम:
२१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिंधुर्हिमादिर्विषयोमतः॥

४ पर्थीरसंतेजसस्तु

रणायद्रव्यत्वंदेयम्।विषयंदर्शयति।सिंधुर्हिमादिरिति।सिन्धुःसमुद्रःहिमंतुषारःआदिशब्दात्करका
श्चारकरकादिःसर्वोपिग्राह्यः।नचहिमकरकयोःकठिनत्वात्पार्थिवत्वमितिवाच्यम्।उष्मणाविलीनयो
स्तयोर्जलत्वस्यप्रत्यक्षसिद्धत्वात्।।यद्द्रव्यंयद्द्रव्यध्वंसजन्यमितिव्याप्तेर्जलोपादानोपादेयत्वसिद्धेः।अदृष्ट
विशेषेणाद्रवत्वप्रतिरोधात्।करकायांकाठिन्यप्रत्ययस्यभ्रान्तत्वात्।तेजोनिरूपयति।स्पर्शउष्णइत्यादिना
।उष्णस्पर्शनिष्ठोजातिविशेषःप्रत्यक्षसिद्धः।इत्थंचजन्योष्णस्पर्शसमवायिकारणतावच्छेदकतेजस्त्व
जातिविशेषः।तस्यपरमाणुवृत्तित्वंतुजलत्ववदेवानुसंधेयम्।नचोष्णस्पर्शवत्त्वंचन्द्रकिरणादावव्याप्त
मितिवाच्यम्।तत्राप्युष्णत्वसत्त्वात्।किंतुतदन्तःपातिजलस्पर्शेनाभिभवादग्रहः।एवंरत्नकिरणादौग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादूर्ध्वं शुक्लभास्वरं।१

त १ त्वं २ त ३

शु र्थिवस्पर्शेनाभिभवाच्च करादौ चानुभूतत्वाच्च नं तद्ग्रहः। सूर्या दिवैश्वानरे मरकतकिरणादौ च पा
२२ र्थिवरूपेणाभिभवात्। शुक्लत्वाग्रहः। तद्रूपाग्रहे धर्मिणोपि चाक्षुषं न स्यादिति चेन्न। अन्यदीयरूपेण धर्
नैमित्तिकद्र मिणो ग्रहसम्भवात्। शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लरूपं नाभिभूतं किन्तु तदीयशुक्लत्वमभिभूतमि
वत्वं तु ४ त्यन्ये। नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्वात्। न च नैमित्तिकद्रवत्वं दहनादावव्याप्तं घृतादा
वतिव्याप्तमिति वाच्यम्। पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्।
पूर्ववदिति। जलस्येवेत्यर्थः। तथाहि। तद्द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपं तदन्यदनित्यम्। अवय
वि तच्च त्रिधा शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धम्। अत्र यो विशेषस्त

नित्यतादि च पूर्ववत्॥२ दृ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



माह्यं इन्द्रियमिति। चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्य
स्वीयस्पर्शव्यञ्जकत्वात् प्रथमं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीये
ति। अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं परकीयेति न देयम्। पार्थिवच्छगणके व्यभिचारवारणाय द्वितीयं दे
यमेव। चक्षुःसंनिकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति वह्नीति। ननु सुवर्णस्य तैजसत्वे
किंप्रमाणमिति चेन्न। सुवर्णं तैजसं असति प्रतिबंधके अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्। यन्नैवं त
न्नैवम्। यथा पृथिवीति। नचाप्रयोजकम्। पृथिवीद्रवत्वस्य जलद्रवत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात्।
ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रवत्वात्तेन व्यभिचार इति चेन्न। जलमध्यस्थमसीक्षोदवत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
२३

स्याद्रवत्वात्। अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात्। न प्रतिबंध
कं विजातीयद्रवद्रव्यसंयुक्तं कल्प्यते। तथा हि। अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्र
तिबंधकद्रवद्रव्यसंयुक्तः। अत्यन्ताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात्। तज्जलम
ध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्। वायुं निरूपयति। अपाकज इति। अ
पाकजोनुष्णाशीतस्पर्शस्तु पवने मतः। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तम्। अपाकज इति
अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति। एतेन वायवीयो विजातीयस्पर्शो दर्शितः। तज्ज राम: २३
नकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिंगकः। वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते

३ तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः॥३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



विजातीँस्पर्शेनविलक्षणशब्देनतृणादीनांधृत्याशाखादीनांकंपेनवायोरनुमानात्।यथाचवायुर्न
प्रत्यक्षस्तथाग्रेवक्ष्यते।पूर्ववदिति।वायुर्द्विविधः।नित्योऽनित्यः।परमाणुरूपोनित्यः।तदन्योऽनित्यः।स
मवेतश्च।सोऽपित्रिविधः।शरीरेनित्यविषयभेदात्।तत्रशरीरमयोनिजंपिशाचादीनांपरलुजलीय ।।न्द्रियम्।।
तैजसवायवीयशरीराणांपार्थिवभागोपष्टंभकत्वादुपभोगसाधनत्वंजलादीनांप्राधान्यंजलीयता
दिकमिति।अनयोर्विशेषस्तमाह।देहव्यापीति।शरीरमात्रव्यापकंस्पर्शग्राहकंत्व[redacted]नि।तच्चवायवीयं।रूपादिषु
मध्येस्पर्शस्यैवाभिव्यंजकत्वात्।अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवत्।विषयंदर्शय

देहव्यापित्वगिन्द्रियम्।।३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः॥

नाना २

मु. २४ ति॥ प्राणादिरिति॥ यद्यपि अनित्यो वायुश्चतुर्विधः। तस्य चतुर्विधं प्राणादिरित्युक्तमाकरे। तथापि संक्षेपा
देव त्रैविध्यमुक्तम्। प्राणस्त्वेक एव। हृदयादिनानास्थानवशान्मुखनिर्गमनादिक्रियावशाच्च नानासं
ज्ञां लभते। आकाशं निरूपयति। आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः। आकाशकालदिशामेकैक
व्यक्तिकत्वादाकाशत्वादिकं न जातिः। किन्तु आकाशत्वं शब्दाश्रयत्वम्। वैशेषिक इति कथनं तु विशे
षगुणान्तरव्यवच्छेदाय। एतेन प्रमाणमपि दर्शितम्। तथाहि। शब्दो गुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रि
यग्राह्यजातिमत्वात्। स्पर्शवत्। शब्दो द्रव्यसमवेतः गुणत्वात्। संयोगवदित्यनुमानेन शब्दस्य द्रव्यसम
वेतसिद्धिः। शब्दो न स्पर्शवद्विशेषगुणः। अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुण मुक्ताः २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वकप्रत्यक्षत्वात्। सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम्। पररूपादौ व्यभिचारवारणा
य अकारणगुणपूर्वकेति। जलादिपरमाणुरूपे व्यभिचारवारणाय प्रत्यक्षेति। न दिक्कालमनसां गुणः
।विशेषगुणत्वात्। रूपवत्। नात्मविशेषगुणः। बहिरिंद्रिययोग्यत्वात्। रूपवत्। इत्थं च शब्दाधिकरणं
नवमं द्रव्यं गगननामकं सिध्यति। न च वायवयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उ
त्पद्यतामिति वाच्यम्। अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्। तत्र च शरीरस्य विषयस्य वा
भावादिंद्रियं दर्शयति। इंद्रियं त्विति। इंद्रियन्तु भवेच्छ्रोत्रं। नन्वाकाशं लाघवादेकं सिद्धम्। श्रोत्रन्तु पुरुष
भेदाद्भिन्नं कथमाकाशं स्यादत आह। एकः सन्नपि इति। एकः सन्नप्युपाधितः। आकाश एकः सन्नप्युपाधेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु॰ कर्णशष्कुल्यादेर्भेदाद्भिन्नंभिन्नंश्रोत्रात्मकंभवतीत्यर्थः।कालंनिरूपयति।जन्यानामिति।जन्यानां
२५ जनकःकालः।तत्रप्रमाणंदर्शयितुमाह।जगतामिति।जगतामाश्रयोमतः॥ ४५ ॥तथाहिइदानीं
घटइत्यादिप्रतीतिःसूर्यपरिस्पंदादिकम्।यदाविषयीकरोतितदासूर्यपरिस्पन्दादिनाघटादेःसंबंधो
वाच्यः।सचसंयोगादिर्नसंभवतीतिकालएवसंबंधघटकःकल्प्यते।इत्थंतस्याश्रयत्वंसम्यक्।प्रमा
णांतरंदर्शयति।परापरत्वेति।परापरत्वधीहेतुः।परत्वापरत्वादिबुद्धेरसाधारणनिमित्तंकालएव॥
परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतयाविनिगमनाविरहात्।लाघवादतिरिक्तएव।कल्प्य रामः
तइतिभावः।नन्वेकस्यकालस्यसिद्धौक्षणदिनमासवर्षादिसमयभेदोनस्यादतआहक्षणादिरिति २५



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।क्षणादिः स्यादुपाधितः। कालस्त्वेकोप्युपाधिभेदात्क्षणादिव्यवहारविषयः। उपाधिस्तु स्वजन्यविभा
गप्रागभावावच्छिन्नं कर्म। पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रा
गभावो वा। उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यम्॥
पुनरपि क्रियाक्रियान्तोविभागोत्पत्त्या कर्मान्तरसत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति
तदाऽनायत्या ध्वंसेनैवोपपादनीयः। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरिति। दिशं निरूपयति। दूरान्ति योर२
केति। दूरान्तिकादिधीहेतुरेकानित्यादिगुच्यते॥ ४८॥ दूरत्वमन्तिकत्वं च दैशिकपरत्वापरत्वे वोध्यम्
तद्बुद्धेरसाधारणबीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया सिध्यतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. मावः। नन्वेकै[illegible]व हि यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामित्यत आह। उपाधीति। उपाधि
२६ भेदादेकापि प्राच्यादिव्यवहारभाक्। यत्पुरुषस्योदयगिरिसंनिहिता या दिक् तत्पुरुषस्य सा प्राची। एवमुद
यगिरिव्यवहिता च प्रतीची। एवं तत्पुरुषीयसुमेरुसन्निहिता दिगुदीची। तद्व्यवहिता ऽवाची। सर्वेषामेव
वर्षाणां मेरुरुत्तरतः स्थित इति नियमात्। आत्मानं निरूपयति। आत्मेति। आत्मेन्द्रियाद्यधिष्ठाता। आत्म
त्वं जातिः सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति। ईश्वरेऽपि सा जातिरस्ति। एवं चादृष्टादि
रूपकारणाभावान्न तत्र सुखदुःखाद्युत्पत्तिः। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इत्यस्याप्रयोजकत्वात्। अ एमः
परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः। ज्ञानवत्त्वेन विभजनादित्याहुः। इन्द्रि २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादीति।अधिष्ठाता इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः।यद्यप्यात्मनि अहं सुखीत्यादिप्रत्य
क्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नत्वमनुमितिगोचर इति प्रतिपादि
तुं न शक्यत इत्यतः प्रमाणं दर्शयति।करणं हि इति।करणं हि सकर्तृकम्॥ ४७ ॥वास्यादीनां छिदाकर
णानां कर्तारमंतरेण फलानुपधानं दृष्टम्।एवं चक्षुरादीनां ज्ञानकरणानामपि कर्तारमन्तरेण फलोप
धानं नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते।ननु शरीरस्यैव कर्तृत्वमस्त्वत आह।शरीरस्येति।शरीरस्य न चै
तन्यं मृते व्यभिचारात्।ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्ष
तिः।प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न।शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु·
२८ नेः। शरीराणामवयवोपचयापचयेहत्यादविनाशशालित्वात्। नचपूर्वशरीरोत्पन्नसंस्कारेणाद्वितीयश
रीरेसंस्कारउत्पद्यतइतिवाच्यम्। अनन्तसंस्कारकल्पनायांगौरवात्। एवंशरीरस्यचैतन्येबालकस्यस्त
न्यपानादौप्रवृत्तिर्नस्यात्। इष्टसाधनताज्ञानस्यतद्धेतुत्वात्। तदानीमिष्टसाधनत्वानुभावकाभावात्।
मन्मतेतुजन्मांतरानुभूतेष्टसाधनत्वस्यतदानींस्मरणादेवप्रवृत्तिःभवजन्मांतरानुभूतमप्यस्मर्य
तेतिवाच्यम्। उद्बोधकाभावात्। अत्रत्वनायम्याजीवनादृष्टमेवोद्बोधकंकल्प्यते। इत्थंचसंस्कारस्यानादि
तयाआत्मनोऽप्यनादित्वसिद्धौ। अनादिभावस्यनाशासंभवात्नित्यत्वंसंभवतीतिबोध्यम्। ननुचक्षुरादी
नामेवज्ञानादौकरणत्वंकर्तृत्वंचास्तुविरोधेसाधकाभावादतआह। तथात्वेचेदिंद्रियाणामुपघातेकथं एमः
२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतिः तथात्वमिति। चैतन्यमित्यर्थः। उपघाते नाशे सतिमर्थाच्चक्षुरादीनामेव॥ कथमिति। पूर्वं चक्षु
षा साक्षात्कृतानां चक्षुषोऽभावे स्मृतिर्न स्यात्। अनुभवितुरभावात्। अन्यानुभूतस्यान्येन स्मरणायो
नस ६ गात्। अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः। ननु चक्षुरादीनां चैतन्यं मा
स्तु मनस्तु नित्यस्य चैतन्यं स्यादत आह। मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्। मन इति न तथा न चैत
न्यं मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वात्। मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः।
यथा मनसोऽणुत्वं तथाऽग्रे वक्ष्यते। नन्वस्तु विज्ञानमेवात्मा। तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वम्। ज्ञा
नसुखादिकं तस्यैवाकारविशेषः। तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु.
२८

त्पत्तेः। सुषुप्तावपि आलयविज्ञानधारा निराबाधैव। मृगमदवासनाया वसन इव पूर्वपूर्वविज्ञानज
नितसंस्काराणां उत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न। तस्य जगद्विषयकत्वे
सर्वज्ञत्वापत्तेः। यत्किंचिद्विषयकत्वे विनिगमकाभावः। सुषुप्तावपि विषयावभासप्रसंगात्। तदानीं निरा
कारचित्तसंततिरनुवर्तत इति चेन्न। तस्याः स्वतःप्रकाशत्वे प्रमाणाभावात्। अन्यथा घटादीनामपि विज्ञा
नत्वापत्तिः। न चेष्टापत्तिः विज्ञानातिरिक्तवस्तुनो ऽभावादिति वाच्यम्। घटादेरनुभूयमानस्यापलपितु
मशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेन्न। किमयमाकारोऽतिरिच्यते विज्ञानान्न हि। समा एमः
यातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेन्न हि समूहालंबने नीलाकारोऽपि पीताकारः स्यात्। तद्रूपतो वि २८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानस्याविशेषात्। अपोहरूपेनीलत्वादिर्विज्ञानधर्म इति चेन्न। नीलत्वादीनां विरुद्धानां एकस्मिन्नस
मावेशात्। इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। न वा वासना संक्रमः संभवति मातृपुत्रयो
रपि वासनासंक्रमप्रसंगात्। न चोपादानोपादेयभावो नियामक इति वाच्यम्। वासनायास्संक्रमासंभ ज्ञाना ८
वात्। उत्तरस्मिंस्तस्मिन्नेव संक्रम इति चेन्न। तदुत्पादकाभावात्। विनाशेवोत्पादकत्वे तदानन्त्यप्रसंगः।
क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न। मानाभावात्कल्पनागौरवाच्च। एतेन क्षणिकशरी
रेष्वेव चैतन्यमपि प्रत्युक्तम्। गौरवादतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानाभ्यामेवोप
पत्तेः। कुर्वद्रूपत्वाकल्पनात्। अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यज्ञानमेवात्मा। अविनाशी वा अरेऽयमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्तव्यमिति ध्

गु.
२९

त्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेरिति चेन्न। तस्याः सविषयकत्वासंभवस्य दर्शितत्वात्। निर्विषयस्य
ज्ञानत्वे मानाभावात्। सविषयस्याप्यननुभवात्। अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धम्। सत्यं ज्ञानमिति ब्र
ह्मपरं जीवेषु नोपयुज्यते। ज्ञानाज्ञानसुखित्वासुखित्वादिभिर्जीवानां भेदसिद्धेः सुतरामीश्वरभेदः। अन्यथा
बंधमोक्षव्यवस्थानुपपत्तेः। योपीश्वराभेदबोधको [illegible]दः सोपि तदभेदेन [illegible]प्रतिपादयन् स्तौति। अ तदियत्वं
भेदभावनयैव [illegible]वदति। अत एव सर्व एवात्मानः समर्पिता इति श्रूयते। मोक्षदशायामज्ञाननिवृ
त्ताव भेदो ज्ञायत इत्यपि न। भेदस्य नि[illegible]त्वेन नाशायोगात्। भेदनाशेपि व्यक्तिद्वयं स्यादेव। न च द्वित्वम
पि नश्यतीति वाच्यम्। तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदितिवत्। द्वित्वाभावेपि द्वयात्म

राम:
२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



कौनौऽइतिसुवचत्वात् । मिथ्यात्वाभावोधिकरणात्मकत्वत्रसम्यत्वमितिचेत् । एकत्वाभावोव्यक्तिद्वयात्मको
द्वित्वमित्यप्युच्यताम् । प्रत्येकमेकत्वेपिपृथिवीजलयोर्नगंधइतिवदुभयंनैकमित्यस्यसर्वजनसिद्धत्वात् ।
 योपितदानीमभेदप्रतिपादकश्रौंमःसोनिर्दुःखत्वादिनासाम्यंप्रतिपादयन्ति । संपदाधिक्येपुरोहितोयंराजा
संवृत्तइतिवत् ॥ अतएवनिरंजनःसाम्यमुपैतीतिश्रूयते । ईश्वरोपिनज्ञानसुखात्मा किंतुज्ञानाद्याश्रयः
नित्यंविज्ञानमानंदंब्रह्मेत्यादौविज्ञानपदेनज्ञानाद्याश्रयएवोक्तः । यःसर्वज्ञइत्याद्यनुरोधात् । आनंदमित्य
स्याप्यानंदवदित्यर्थः । अर्शादित्वान्मत्वर्थीयाच्प्रत्ययात् । अन्यथापुल्लिंगत्वापत्तेः । आनन्दोपिदुःखाभावे
नउपचर्यते । भाराद्यपगमेसुखीसंवृत्तोहमितिवत् । अस्तुवातस्मिन्नानन्दोनत्वसावानन्दः । असुखमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु कृतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेन्नाक्लिष्टकल्पनापत्तेः प्रकरणविरोधादानंदश्रुत्यत्र मत्व
३० र्थीयप्रत्ययविरोधाच्चेति संक्षेपः। एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्यका
रणयोरभेदात्। कार्यनाशे सति कार्यरूपतया नाशो न स्यादित्यकारणत्वं तस्य। बुद्धिगतचैतन्याभिमा
नान्यथानुपपत्त्या तत्कल्पनं बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वमंतःकरणमित्युच्यते तेन तत्त्वास
त्त्वाभ्यां पुरुषस्य संसारापवर्गौ तस्या एवेंद्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादीनां संबंधः पुरुषे
कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छ एमः
तया चेतनप्रतिबिंबादत्तान्विकोदर्पणस्येव मुखोपरागः इदमिति विषयोपरागः इंद्रियप्रणालिकया परि ३०

णाति भेदस्तात्त्विकः। निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारावेशः। तेनांशत्रयव
ती बुद्धिः तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः संबंधः दर्पणमलिनिम्नेव मुखस्योपलक्षिहृष्यते॥
ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चे
तनापरिणामित्वात्। इति मन्तव्यम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः
तद्भिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतेः। चैतन्यं बुद्धेर्धर्म इति। चेतनाकृत्यंशोऽपि किं नेष्यते। अन्यथा
बुद्धेर्नित्यत्वे मोक्षाभावः। अनित्यत्वे तत्पूर्वमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेरचैतन्यं का
रणयोस्तादात्म्यात्। इति चेन्न। असिद्धेः जडात्मकत्वासिद्धेः कर्तृजन्यत्वे मानाभावात्। वीतरागजन्मादर्शे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



नु. नात् । अनादित्वम् । अनादेर्नाशासंभवान्नित्यत्वम् । तत्किंप्रकृत्यादिकल्पनेन । नचप्रकृतेःक्रियमाणानिगु
३१ णैःकर्माणिसर्वशः । अहंकारविमूढात्माकर्ताहमितिमन्यते । इत्यनेनविरोधइतिवाच्यम् । प्रकृतेरदृष्टस्य
गुणैरदृष्टजन्यैरिच्छादिभिःकर्ताहमेवेत्यस्यतदर्थत्वात् । तत्रैवंसतिकर्तारमात्मानंकेवलंतुपश्यत्यादिवद
ताभगवताप्रकटीकृतोयमुपरिष्टादाशयइतिसंक्षेपः । धर्माधर्माश्रयइति । आत्मेत्यनुषज्यते । शरीरस्यत
दाश्रयत्वेदेहान्तरकृतकर्मणांदेहान्तरेणाभोगानुपपत्तेः । विशेषगुणयोगतः । इति । योग्यविशेषगुणासंबं प्रवृत्त्याद्यनुमेयो
धेनआत्मनःप्रत्यक्षंभवतिनत्वन्यथा । अहंजानेकरोमीत्यादिप्रतीतेः । प्रवृत्तीति । आत्मापरदेहादौप्रवृत्त्या यत्न१२ ऌमः
दिनानुमीयतेप्रवृत्तिरत्रचेष्टा । ज्ञानेच्छाप्रयत्नादीनांदेहेऽभावस्योक्तप्रायत्वात् । चेष्टायाश्चप्रयत्नसा ३१

विशेष ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अहंकारस्याश्रयोऽहं ३

रथे १ मनोमात्रस्यगोचरः ३

धर्मत्वात् चेष्टायाः प्रयत्नवानात्मानुमीयते इति भावः। तत्र दृष्टान्तमाह। रथगत्येव सारथिः इति। यद्यपि रथकु
र्मचेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः।
अहंकारस्येति। अहंकारोऽहमिति प्रत्ययः तस्याश्रयो विषय आत्मा न शरीरादिरिति। मन इति। मनोभिन्ने विभुर्बुद्ध्यादि
न्द्रियजन्यप्रत्यक्षाविषयः मानसप्रत्यक्षविषयश्चेत्यर्थः रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्। विभुरिति। गुणवान् ५
विभुत्वं परममहत्परिमाणत्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति। बुद्धिसुखदुःखेच्छादयश्चतु
र्दश गुणाः पूर्वमुक्ता वेदितव्याः। अत्रैव प्रसंगात् बुद्धेः कतिपयप्रपंचं दर्शयति। बुद्धिर्द्विविधेति। द्वैविध्य मता॥ बुद्धिरिति
मुपपादयति। अनुभूतिरिति। चतुर्विधेति। एतासां चतसृणां करणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमा

अनुभूतिस्मृतिश्च ज्ञाना। अनुभूतिश्चतुर्विधा ५१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षमप्यनुमितिरित्यपि ॰मितिशब्दे॥१
पा.पक्षं ज्ञानं अव्यपदेश्यादी अव्य भ॰ वा ॰ व्यवसायात्मकं म

मु
३२ णानि इति सूत्रोक्तानि वेदितव्यानि। प्रत्यक्षमिति। इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियज
न्यं सर्वमेव ज्ञानं तथापि इन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितं। ई
श्वरप्रत्यक्षं तु न लक्ष्यम्। इन्द्रियार्थसन्निकर्षोत्पन्नमिति। सूत्रेण तथैवोक्तत्वात्। अथवा ज्ञानाकरणकं ज्ञा
नं प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य
करणत्वान्न तत्रातिव्याप्तिः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्। परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि
परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः। न च कादाचि ए.मः
त्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्। तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षित ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्॥ घ्राण
६स्य गोचरो गंधो गंधत्वादिरपि स्मृतः॥१

त्वात्। अथवाप्तिज्ञानकरणकं ज्ञानमनुमितिः। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः। पदज्ञानक
रणकं ज्ञानं शाब्दबोधः। वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षाद्यवृत्तिजातिमत्त्वम
नुमितित्वं। एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादि
कं वाच्यमिति। जन्यप्रत्यक्षाणि विभजते। घ्राणजादीति। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमि
ति षड्विधं प्रत्यक्षम्। न वेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्। उक्त
स्वानुसारेण। गोचर इति। ग्राह्य इत्यर्थः। गंधत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः। गंधस्य प्रत्यक्षत्वात्त
द्वृत्तिजातिरपि प्रत्यक्षा। गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति। रसत्वादिसहितः

१ तथा रसो रसज्ञाया ... १
स्तथा शब्दोपि च श्रुतेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये। विभागसंयोगपरापरत्वे स्नेहो द्रवत्वं परिमाणयुक्तम्॥
क्रियाजातियोग्यवृत्तिंसमवायश्च तादृशम्॥ गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः॥

मु॰ २२ इत्यर्थः। तथा शब्दत्वादिसहितः। रसो गंधश्चोद्भूतो बोध्यः। उद्भूतरूपमिति। त्रीण्यपि आदावनुद्भूतरूपमिति न
तत्प्रत्यक्षम्। तद्वंति। उद्भूतरूपवन्ति। योग्येति। पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तिग्राह्यं। तादृशः योग्य
व्यक्तिवृत्तिरित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह। गृह्णातीति। आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्य
क्षे कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबंधेन कारणत्वम्। द्रव्यसमवेतप्रत्यक्षे स्वाश्रयस
मवायसंबंधेन। द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति। उद्भूत
स्पर्शवदिति। उद्भूतस्पर्शवद्द्रव्यं [illegible] गोचरः सोपि। उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः। रूपान्यदिति। रू एमः २२
पभिन्नं रूपत्वादिभिन्नं च यच्चक्षुर्योग्यं तत्त्वगिंद्रियस्यापि ग्राह्यम्। तथा च पृथक्त्वसंख्यादयो ये चक्षुर्यो

रचलपः॥ सोपि

रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणं॥ २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



स्या गुणा उक्ताः। एवं क्रिया। एवं जातयो योगपवृत्तयश्च त्वचो ग्राह्या इति। अत्रापि त्वगिन्द्रियजन्येपि द्रव्य
प्रत्यक्षे रूपं कारणम्। तथा च वहिरिंद्रियजन्यद्रव्यप्रत्यक्षत्वे रूपं कारणमिति। नवीनास्तु वहिर्द्रव्यप्रत्य
क्षे न रूपं कारणं प्रमाणाभावात्। किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शने प्रत्यक्षे च स्पर्शः कारणम्। अन्वयव्य
तिरेकात्। वहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न किंचेत् आत्मावृत्तिशब्दभिन्नविशेषगु
णवत्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न। वायोस्त्वगिंद्रियेणाग्रहणप्रसंगात्। इ
ष्टापत्तिरिति चेत् । उद्भूतस्पर्श एव लाघवात्कारणमस्तु। प्रभाया अप्रत्यक्षत्वे निष्टापत्तिरस्त्येव किं
न स्यात् तस्मात् प्रभां पश्यामीति तत् वायुं स्पृशामीति प्रत्ययसत्त्वाद्वायुरपि प्रत्यक्षो भवत्येव। वहिर्द्रव्यप्रत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



मु. २४ क्षमात्वेतुनरूपस्यनवास्पर्शहेतुत्वं।वायुप्रभयोरेकत्वंगृह्यतएव।क्वचिद्द्वित्वादिकमपि।क्वचित्तंरव्याप
रिमाणाद्यग्रहोदोषादित्याहुः।त्वचोयोगइति।त्वङ्मनःसंयोगोज्ञानसामान्येकारणमित्यर्थः।किंतत्रप्रमा
णम्।सुषुप्तिकालेत्वचंत्यक्त्वापुरीततिवर्तमानेनमनसाज्ञानाजननमिति।नतुसुषुप्तिकालेकिंज्ञानं
भविष्यति।अनुभवरूपंस्मरणरूपंवानाद्यः।अनुभवसामग्र्यभावात्।तथाहिप्रत्यक्षेचक्षुरादिनासह
मनःसंयोगस्यहेतुत्वात्।तदभावादेवनचाक्षुषादिप्रत्यक्षम्।ज्ञानादेरभावादेवनमानसप्रत्यक्षम्।ज्ञा
नाद्यभावादेवनात्मप्रत्यक्षमपिव्याप्तिज्ञानाभावादेवनानुमितिः।सादृश्यज्ञानाभावान्नोपमितिःपदज्ञा तन:
नाभावान्नशाब्दबोधःइत्यनुभवसामग्र्यभावान्नानुभवः।उद्बोधकाभावान्नस्मरणम्।मैवम्।सुषुप्ति २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षाक्षकालोत्पन्नेच्छादिव्यक्तेस्तत्संबंधेनात्मनश्च प्रत्यक्षत्वप्रसंगात्। तदतीन्द्रियत्वे मानाभावात्। सुषु-
प्तिप्राक्काले निर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयो-
गस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकालेपि त्वाचप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्-
मनःसंयोगस्य च सत्त्वात्। परस्परप्रतिबंधादेकमपि वा न स्यादिति। अत्र केचित्॥ पूर्वोक्तयुक्त्या त्वङ्मनः
संयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुभवानुरोधात्कल्प्यत इति। अ-
स्तु। युक्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते। चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयो-
गाभावान्न त्वाचप्रत्यक्षमिति। मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषय इत्यर्थः। मतिर्ज्ञानम्। कृतिर्यत्नः

१ मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानेयन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते २

मु.
३५

।एवं सुखत्वादिकमपि मनोग्राह्यम्।एवमात्मापि मनोग्राह्यः।किन्तु मनोमात्रस्य गोचर इत्युक्तत्वादत्र पुन
र्नोक्तः।[illegible]ज्ञानमिति।चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न संभवति।पूर्वं
विशेषणस्य घटत्वादेर्ज्ञानाभावात्।विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।तथा च प्रथमतो घटघ
टत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते।तदेव निर्विकल्पकं तच्च निर्विकल्पकं न प्रत्यक्षम्।तथाहि।वैशि
ष्ट्यानवगाहि[illegible]ज्ञानस्य प्रत्यक्षत्वं न भवति।घटमहं जानामीति प्रत्ययात्।तत्र ज्ञाने आत्मनि प्रकारीभू
य भासते ज्ञाने घटस्तत्र घटत्वम्।प्रकारो यः स एव विशेषणमित्युच्यते।विशेषणे यद्विशेषणं तद्विशेष
णतावच्छेदकमित्युच्यते।विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम्।निर्विकल्प

राम:
३५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महत्त्वं षड्विधे हेतुः ३

केच घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञानेन संभवति। घटत्वाद्यप्रका
रकं च घटादिविशिष्टज्ञानं न संभवति। ज्ञात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात्।
महत्त्वं षट्विधइति। द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामा
न्यानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वरूपत्वादीनां प्रत्यक्षे
स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति। इन्द्रियमिति। अत्रापि षड्विध इत्यनुषज्यते। इंद्रिय
त्वं तु न जातिः। पृथिवीत्वादिना सांकर्यात्। किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणम
नःसंयोगाश्रयत्वम्। आत्मादिवारणाय सत्यन्तं। उद्भूतविशेषगुणस्य श्रोत्रे सत्वाच्छब्देतरेति। विशेषगु

इन्द्रियं कारणं मतम्॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
२५ णस्परूपादेश्चक्षुषिसत्वात्।उद्भूतेति।उद्भूतत्वंनजातिःशुक्लत्वादिनासांकर्यात्।नचशुक्लत्वादिव्याप्यं
नानैवउद्भूतत्वमितिवाच्यम्।उद्भूतरूपत्वादिनाचाक्षुषादौजनकत्वानुपपत्तेः।किन्तुशुक्लत्वादिव्याप्यम
उद्भूतत्वंनानातदभाववत्त्वमनुद्भूतत्वम्।तच्चसंयोगादावपि।तथाचशब्देतरोद्भूतगुणःसंयोगादिश्चक्षु
राद्यावेस्यतोविशेषेति।कालादिवारणायविशेष्यदलम्।इंद्रियावयवविषयसंयोगस्यापिप्राचांमतेप्र
त्यक्षजनकत्वात्।इंद्रियावयववारणायकालादौरूपाभावप्रत्यक्षेसंनिकर्षघटकतयाकारणीभूतच
क्षुःसंयोगाश्रयस्यकालादेर्वारणायमनःपदम्।ज्ञानकारणमित्यपिनवारणाय।कारणमिति।अ
साधारणंकारणंकरणम्।असाधारणत्वंव्यापारवत्वम्।व्यापारःसन्निकर्षः।षड्विधंसन्निकर्षम्।उदा राम:
२५

विषयेन्द्रियसंबंधोव्यापारःसोपिषड्विधः॥१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ द्रव्यग्रहणे तु संयोगात् संयुक्तसमवायात्॥ द्रव्येषु समवेतानां तथा तत्समवायतः। तत्रापि समवेतानां शब्दस्य समवायतः।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।

इत्यादिना दर्शयति। द्रव्यग्रहस्त्विति। द्रव्यप्रत्यक्षं इंद्रियसंयोगजन्यम्। द्रव्यसमवेतप्रत्यक्षम् इन्द्रियसं
युक्तसमवायजन्यम्। एवमग्रेपि। वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचा
क्षुषं प्रति चक्षुःसंयुक्तसमवायः। द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः।
एवमन्यत्रापि विशिष्यैव कार्य्यकारणभावः। परन्तु। पृथिवीपरमाणुनीलेनीलत्वं पृथिवीपरमाणौ पृ
थिवीत्वं च चक्षुषा कथं न गृह्यते। तत्र परंपरयोद्भूतरूपसंबंधस्य महत्त्वसंबंधस्य च विद्यमानत्वात्॥
तथाहि। नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्तते तथा च महत्त्वसंबंधो घटनीलमादाय व
र्त्तते रूपसंबंधस्तूभयमादायैव वर्तते। एवं पृथिवीत्वेपि घटादिकमादाय महत्त्वसंबंधो बोध्यः। एवं वायौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व व

मु. २७ तदीयस्पर्शादेश्चसत्तायाश्चाक्षुषप्रत्यक्षंस्यात्।तस्मादुद्भूतरूपत्वाँच्छिन्नमहत्वाँच्छिन्नचक्षुःसंयुक्त
समवायस्यद्रव्यसमवेतप्रत्यक्षेतादृशचक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेतप्रत्य
क्षेकारणत्वंवाच्यम्।इत्थंचपरमाणुनीलादौननीलत्वादिग्रहः।परमाणौचक्षुःसंयोगस्यमहत्वाव
५३ च्छिन्नत्वाभावात्।एवंवाय्वादौनसत्तादिचाक्षुषंतत्रचक्षुःसंयोगस्यरूपानवच्छिन्नत्वात्।एवंयत्रघट
स्पर्शावच्छेदेनालोकसंयोगश्चक्षुःसंयोगस्त्वग्रावच्छेदेनतत्रघटप्रत्यक्षाभावादालोकसंयोगावच्छेद
कावच्छिन्नत्वंचक्षुःसंयोगेविशेषणंवाच्यम्।एवंस्पार्शनप्रत्यक्षेत्वक्संयोगःकारणम्।द्रव्यसमवेत एमः
स्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवायः।द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवा २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः। अत्रापि महत्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम्। एवं गंधप्रत्यक्षे घ्राणसंयुक्त
समवायः गंधसमवेतप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः। रसप्रत्यक्षे रसनसंयुक्तसमवायः। रस
समवेतस्य रासनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवा
यः। शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः। अत्र सर्वत्र प्रत्यक्षे
लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकं प्रत्यक्षमिंद्रियसंयोगं विनापि भवति। एवमात्मप्रत्यक्षे मनःसं
योगः। आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः। आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयु
क्तसमवेतसमवायः कारणम्। विशेषणतया तदभावानां ग्रहो भवेत्। अभावप्रत्यक्षे समवायप्रत्यक्षे च

१ प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु: इंद्रियसंबद्धविशेषणतताहेतुः। वैशेषिकमतेतु समवायोनप्रत्यक्षः। अत्र यद्यपि विशेषणता नानाविधा। तथा
३८ हि। भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते। संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषण
तया। संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया। शब्दाभावः केवलया श्रोत्रावच्छि
न्नविशेषणतया। कादौ घत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वादौ खत्वाद्यभावः॥
श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया। एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणतया। घ
टाभावादौ घटत्वाद्यभावः संयुक्तविशेषणविशेषणतया॥ एवमन्यदप्यूह्यम्। तथापि विशेषणतात्वे
न एकैव सा गण्यते। अन्यथा षोढा सन्निकर्ष इति प्रवादो व्याहन्येत। यदित्यादि। अभावप्रत्यक्षे योग्यानु एनः ३८

१ यद्यदित्यादुपलभ्येतेत्येवं यत्र प्रसज्यते॥

श्रोत्रावच्छिन्नविशेषण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पलब्धिःकरणम्।तथाहि।भूतलादौघटादिज्ञानेघटाभावादिकंनज्ञायतेतेनाभावोपलंभेप्रतियोग्युपलं
भाभावःकारणम्।तत्रयोग्यताप्यपेक्षितासात्वप्रतियोगिसत्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा।त
दर्थश्चप्रतियोगिनोघटादेःसत्वप्रसक्त्याप्रसंजितउपलंभरूपःप्रतियोगी।यस्यसउपलम्भाभावोऽभा
वप्रत्यक्षेहेतुः।तथाहि।यत्रालोकसंयोगादिकंवर्ततेतत्रयद्यत्रघटःस्यात्तर्हिउपलभ्येतेत्यापादयितुंशक्य
तेतत्रघटाभावादिकंप्रत्यक्षंभवति।अंधकारेतुनापादयितुंशक्यतेतेनघटाभावादेरंधकारेचाक्षुषप्र
त्यक्षन्न।स्पार्शनप्रत्यक्षंतुभवत्येव।आलोकसंबंधंविनापिस्पार्शनप्रत्यक्षस्यापादयितुंशक्यत्वात्।गुरु
तादिकंयदयोग्यंतदभावस्तुनयोग्यः।तत्रगुरुत्वादिकप्रत्यक्षस्यापादयितुमशक्यत्वात्।वायौउद्भूतरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. पाभावः पाषाणादौ सौरभाभावो गुडे तिक्ताभावो वह्नावनुष्णत्वाभावः श्रोत्रे शब्दाभाव आत्मनि सुखाभाव(
३९ एवमादयस्तत्तदिंद्रियैर्गृह्यन्ते। तत्र प्रत्यक्षस्यापादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो यो
ग्यता। अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यत्वमपेक्षितम्। अतः स्तंभादौ पिशाचादिभेदोपि चक्षुषा गृह्य
त एवेति। प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा उक्ताः। अलौकि
कसन्निकर्षानिदानीं वदति। अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः। अलौकिक इति। व्यापारः स
न्निकर्षः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥ ६२ ॥ सामान्यलक्षणा इति। सामान्यं लक्षणं यस्य सन् एनः
निकर्षः। तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपप्रत्यासत्तिरित्यर्थो लभ्यते तच्चेंद्रियसंबद्धवि ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेष्यकज्ञानेप्रकारीभूतंवोध्यम्।तथाहि।इंद्रियसंयुक्तोधूमादिस्तद्विशेष्यकंधूमइतिज्ञानंयत्रजातंतत्रज्ञा
नेधूमत्वंप्रकारंतत्रधूमत्वेनसंनिकर्षेणधूमाइत्येवंरूपंसकलधूमविशेष्यकंज्ञानंजायतेअत्रयदींद्रिय
संवद्धमित्येवोच्यतेतदाधूलीपटलेधूमभ्रमानंतरंसकलधूमविषयकंज्ञानंनस्यात्तत्रधूमत्वेनसहइंद्रि
यसंवंधाभावात्।मन्मतेतुइंद्रियसंवद्धधूलीपटलतद्विशेष्यकंधूमइतिज्ञानंतत्रप्रकारीभूतंधूमत्वम्॥
प्रत्यासत्तिःइंद्रियसंवंधश्चलौकिकोग्राह्यः॥इदंचवहिरिंद्रियस्थलेमानसस्थलेतुज्ञानप्रकारीभूतसा
मान्यंसंनिकर्षः।परंतुसमानानांभावःसामान्यंतच्चक्वचिन्नित्यंधूमत्वादिक्वचिदनित्यंघटादिः।यत्रएको
घटःसंयोगसंवंधेनभूतलेसमवायेनकपालेवाज्ञातःतदनंतरंचसर्वेषांतद्घटवतांभूतलादीनांकपा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लानांवाज्ञानंभवतितत्रेदंबोध्यम्॥परन्तुसामान्यंयेनसंबंधेनज्ञायते।तेनसंबंधेनाधिकरणानांप्रत्यासत्तिः
।किन्तुयत्रतद्घटनाशानन्तरंतद्घटवतांस्मरणंज्ञातंतत्रसामान्यस्पर्शत्वात्सकलविषयकंज्ञानंकुतोन
जन्यते॥तस्मात्सामान्यज्ञानंप्रत्यासत्तिर्ननुसामान्यमित्याह।आसत्तिरिति।प्रत्यासत्तिरित्यर्थः।सामान्य
ज्ञानमिति।तथाचसामान्यलक्षणेत्यत्रलक्षणशब्दस्यविषयोर्थः।तेनसामान्यविषयकंज्ञानंप्रत्यासत्तिरि
त्यर्थोलभ्यते।ननुचक्षुःसंयोगादिकंविनापिसामान्यज्ञानंयत्रवर्तते।तत्रसकलघटादीनांचाक्षुषप्रत्य
संस्यादतआह।तदिंद्रियजेतिअस्यार्थः।यदाबहिरिंद्रियेणसामान्यलक्षणयाज्ञानंजननीयंतदायत्
किंचिद्धर्मिणितत्सामान्यस्यतदिंद्रियजन्यज्ञानस्यसामग्र्यपेक्षितासाचसामग्रीचक्षुःसंयोगआलोक राम: ४०

तदीन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२विषयीषस्यतस्यैवव्यापारोज्ञानलक्षणा॥

तथाच्चसामान्यलक्षणां विना ४

संयोगादिकंतेनांधकारादौचक्षुरादिनाताहृशज्ञानन्नजन्यतेनतुज्ञानलक्षणाप्रत्यासत्तिर्ज्ञानरूपा।य
दिसामान्यलक्षणापिज्ञानरूपातयातयोर्भेदोनस्यादतआह।विषयीति।सामान्यज्ञानरूपाप्रत्यासत्ति
र्हितदाश्रयस्यज्ञानंजनयति।ज्ञानलक्षणाप्रत्यासत्तिस्तुयद्विषयकंज्ञानम्।तस्यैवप्रत्यासत्तिरिति।अ
मर्हति२ त्रास्यमर्थः।प्रत्यक्षेसंनिकर्षंविनाभानंनसंभवति।धूमत्वेनसकलधूमानांवह्नित्वेनसकलवह्नीनांच
ज्ञानंकथंभवितु।तदर्थंसामान्यलक्षणास्वीक्रियते।नचसकलवह्निधूमभानाभावेकाक्षतिरितिवाच्यं
।प्रत्यक्षधूमेवह्निसंबंधस्यगृहीतत्वात।अन्यधूमस्यचानुपस्थितत्वात्धूमोवह्निव्याप्योनवेतिसंशयानु
पपत्तेः॥मन्मतेतुसामान्यलक्षणयासकलधूमोपस्थितौकालान्तरीयदेशांतरीयधूमेवह्निव्याप्यत्वस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. ४१ न्देहः संभवति। नच सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यम्।
प्रमेयत्वेन सकलप्रमेयज्ञाने जातेपि विशिष्य सकलपदार्थानामज्ञानत्वेन सार्वज्ञत्वाभावात्। एवं ज्ञानल
क्षणाया अस्वीकारे सुरभिचंदनमिति ज्ञाने सौरभस्य भानं कथं स्यात्॥ यद्यपि सामान्यलक्षणयापि सौर
भस्य भानं भवति तथापि सौरभत्वभानं ज्ञानलक्षणया। एवं धूमत्वेन धूलीपटलं यत्र ज्ञातं तत्र धूलीपटल
स्यानुव्यवसाये भानं ज्ञानलक्षणया। योगज इति। योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रमाणक
इत्यर्थः। युक्त इति। योगिनो द्विविधा युक्ता युंजानाश्च अतो योगजधर्मस्यापि द्वैविध्यं युक्तस्य तावद्योगजधर्म मु. ४१
साहाय्येन मनसाकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति॥ द्वितीयस्य चिंताधि

स्युक्तयुंजानभेदतः॥ योगजो द्विविधः प्रोक्तो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषोपिसहकारीति॥ ॥इतिप्रत्यक्षनिरूपणम्॥ ॥अनुमितिंव्युत्पादयति। व्यापारस्तुपरामर्शःकरणं
व्याप्तिधीर्भवेत्॥ व्यापारस्त्विति। अनुमायामनुमितेर्व्याप्तिज्ञानंकरणंपरामर्शोव्यापारः। तथाहियेनपुरुषे
णमहानसादौधूमवह्न्योर्व्याप्तिर्गृहीतापश्चाच्चसएवपुरुषःक्वचित्पर्वतादावविच्छिन्नमूलां धूमलेखां
पश्यति। तदनन्तरम्। धूमोवह्निव्याप्यइत्येवंरूपंव्याप्तिस्मरणंतस्यभवतिपश्चाच्चवह्निव्याप्यधूमवानयंपर्व
तइतिज्ञानंजायतेसएवपरामर्शइत्युच्यतेततोयंपर्वतोवह्निमानितिज्ञानमनुमितिरुत्पद्यते॥ अत्रप्राचीना
वदन्ति। व्याप्यत्वेनज्ञायमानंधूमादिकंलिङ्गमनुमितिकरणमितितद्दूषयति। ज्ञायमानमिति। ज्ञायमा
नंलिङ्गंतुकरणंनहि। लिङ्गस्यानुमित्यकरणत्वेयुक्तिमाह। अनागतादीति। अनागतादिलिङ्गेननस्यादनुमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु
४२

लदा॥ यद्यनुमितौ लिंगं करणं स्यात्तदानागतेन विनष्टेन वा लिंगेनानुमितिर्न स्यात्। अनुमितिकरणस्य लिंग
स्य तदानीमभावात् इति। व्याप्यस्येति। व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते॥ व्याप्तिविशिष्टस्य पक्षेण सह वै
शिष्ट्यावगाहि ज्ञानमनुमितिजनकम्। तच्च व्याप्यः पक्ष इति ज्ञानम्। पक्षो व्याप्यवानिति ज्ञानं वा॥ अनुमिति
श्च पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका। पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका द्वि
विधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरित्यन्ये॥ ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि य
त्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादनुमितिदर्शनात् व्याप्तिविशिष्टवै राम:
शिष्ट्यावगाहि ज्ञानं सर्वत्र न कारणम्। किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वमावश्य ४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वात्। विशिष्टवैशिष्ट्यावगाहिज्ञानकल्पने गौरवाच्चेति चेन्न। व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानय
मिति ज्ञानादनुमित्युत्पत्तेः। तथा च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम्॥ किं च धूमवान् पर्वत इ
ति ज्ञानादनुमित्यापत्तिः। व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्त्वात्। न च तदानीं गृ
ह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यम्। चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्म
ताज्ञानादनुमितिः स्यादिति। यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञा
नन्तत्पुरुषीयानुमितौ हेतुरित्युच्यते। तदानन्तकार्यकारणभावः॥ मन्मते तु समवायेन व्याप्तिप्रकारकपक्ष
धर्मताज्ञानं समवायेनानुमितिं जनयत्येवेति॥ नानन्तकार्यकारणभावः॥ यद्व्याप्तिप्रकारकं ज्ञानं पक्षध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु
४२

र्मतावज्ञानंचस्वतंत्रंकारणमित्युच्यते॥तदाकार्यकारणभावद्वयं।वह्निव्याप्योधूमः।आलोकवान्पर्वतइति
ज्ञानादप्यनुमितिःस्यादिति।इत्थंचयत्रज्ञानद्वयंतत्रापिविशिष्टज्ञानंकल्पनीयं।फलमुखगौरवस्यादोष
त्वादिति।व्याप्योनामव्याप्त्याश्रयः।तत्रव्याप्तिःकेत्यतआह॥व्याप्तिःसाध्यवदन्यस्मिन्नसंबंधउदाहृतः।व्या
प्तिःसाध्यवदिति॥वह्निमान्धूमादित्यादौसाध्यंवह्निःसाध्यवान्महानसादिः।तदन्योजलह्रदादिः।तद्वृ
त्तित्वंधूमस्येतिलक्षणसमन्वयः।धूमवान्वह्नेरित्यादौसाध्यवदन्यस्मिन्नयःपिण्डादौवह्नेःसत्वान्नातिव्या
प्तिः।अन्वयेनसंबंधेनसाध्यंतेनैवसंबंधेनसाध्यवान्बोध्यः॥अन्यथासमवायसंबंधेनवह्निमान्वह्न्यवय
वस्तदन्योमहानसादिःतत्रधूमस्यविद्यमानत्वादव्याप्तिप्रसंगात्।साध्यवदन्यश्चसाध्यवत्वावच्छिन्नप्रतियो

एमः
४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणवृत्तिहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुताव
च्छेदकरूपावच्छिन्नवृत्तित्वावच्छिन्नप्रतियोगिकाभाववत्त्वम्॥

गिताकभेदवान्बोध्यः। तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्वेपि न क्षतिः। येन संबंधे
न हेतुता तेनैव संबंधेन साध्यवदन्यावृत्तित्वं बोध्यम्। तेन वह्निमदन्यस्मिन् धूमावयवे धूमस्य समवायसं
बंधेन सत्वेपि न क्षतिः। साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताको भावो बोध्यः। ते
न धूमवान्वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभावेपि न क्षतिः। अन्यथा यद्यपि द्रव्यं गुणकर्मान्यत्वविशि
ष्टसत्वादित्यादौ विशिष्टसत्ताया शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नास्ति। तथापि हे
तुतावच्छेदकरूपेणावृत्तित्वं बोध्यम्। हेतुतावच्छेदकं हेतुनिष्ठानवच्छेदकमिति फलितोर्थः। ननु केवलान्व
यिनि ज्ञेयत्वादौ साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः। किंच सत्तावान्जातेरित्यादौ साध्यवदन्यास्मिन् सामान्या

द्वि त्या १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ ४४ दौहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तेरप्रसिद्धत्वादव्याप्तिरतआह।अथवाहेतुमन्निष्ठविरहाप्रतियोगि
नासाध्येनहेतोरैकाधिकरण्यंव्याप्तिरुच्यते।हेतुमतिनिष्ठावृत्तिर्यस्यसतथाविरहोऽभावः।तथाचहेत्वधि
करणावृत्तिर्योऽभावः।तदप्रतियोगिनासाध्येनसहहेतोःसामानाधिकरण्यंव्याप्तिः।अत्रयद्यपिवह्निमान्धू
मादित्यादौहेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वंतत्तद्वह्न्यादेरस्तीत्यव्याप्तिः।।नचसमानाधिकरण
धूमवह्न्योरेवव्याप्तिरितिवाच्यम्।।तद्वह्नेरप्युभयाभाव[illegible]सत्वादेकसत्वेपिद्वयंनास्तीतिप्रतीतेः।चालनीन्
न्यायेनसर्वेषांगुणानांतत्तदभावप्रतियोगित्वात्।।गुणवान्द्रव्यत्वादित्यादावव्याप्तिश्च।तथापिसाध्यताव राम: ४५
च्छेदकंयत्प्रतियोगितानवच्छेदकंतदवच्छिन्नसाध्यसामानाधिकरण्यंव्याप्तिः।ननुरूपत्वव्याप्यजातिम

नौ२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णान् पृथिवीत्वादित्यत्र साध्यतावच्छेदिकारूपत्वव्याप्यजातयः तासां शुक्लत्वादिरूपाणां नीलघटादि
वृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न तत्र परंपरया स्वाश्रयाश्रयत्वसमाव. यसं
बन्धेन रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्या
मस्ति रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः। एवं दण्डिमान् दण्डसंयोगादित्यादावपि परंपरया
दण्डत्वमेव साध्यतावच्छेदकमिति नाव्याप्तिः। केचित्तु साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यताव
च्छेदकतावच्छेदकविशिष्टाधिकरणं वाच्यम्। तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धस
त्त्वाधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः। हेतुतावच्छेदकसंबंधेन हेत्वधिक

प्रतियोगितावच्छेदकतावच्छिन्नं इत्येव लक्षणघटकमित्यपि वदन्ति
हेत्वधिकरणहेतुतावच्छेदक २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु रणं बोध्यम्॥ तेन समवायेन धूमाधिकरणतद्वयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः। अभावश्च
४५ प्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन एतद्वृक्षवृत्तिकपिसंयो
गाभावप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः। न च प्रतियोगिव्यधिकरणत्वं यद्प्रतियोग्यनधिकर
णवृत्तित्वं तदा तथैवाव्याप्तिः। प्रतियोगिनः संयोगस्यानधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षे मू
लावच्छेदेन सत्त्वात् यदि प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः। सत्ताधिक
रणे गुणादौ यः संयोगाभावः। तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम्॥ हेत्वधिकरणे प्रतियो राम:
ग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्। स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावइ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिनिष्कर्षः॥प्रतियोग्यनधिकरणंप्रतियोगितावच्छेदकावच्छिन्नानधिकरणंबोध्यम्॥तेनविशिष्टसत्ता
वान्जातेरित्यादौजात्यधिकरणगुणादेर्विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपिनक्षतिः॥अत्रस्व
साध्यतावच्छेदकसंवंधेनप्रतियोग्यनधिकरणत्वंवाच्यम्॥तेनज्ञानवान्सत्वादित्यादौसत्ताधिकरणघटा
देर्विषयतासंवंधेनज्ञानाधिकरणत्वेपिनक्षतिः॥इत्थंचवह्निमान्धूमादित्यादौधूमाधिकरणेसमवायसं
वंधेनवह्निविरहसत्वेपिनक्षतिः॥ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिदनधिकरणत्वंत
त्सामान्यस्यवायत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंवाविवक्षितम्॥आद्येकपिसं
योगीएतद्वृक्षत्वादित्यत्राव्याप्तिःकपिसंयोगाभावस्यप्रतियोगितावच्छेदकावच्छिन्नोवृक्षावृत्तिरपिकपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु· संयोगोभवतितदनधिकरणंचवृक्षइति॥ ॥द्वितीयेतुप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः। सर्वस्यैवा
४९ भावस्यपूर्वक्षणावृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्। नचवह्निमान्धूमादित्या
दौघटाभावादेःपूर्वक्षणावृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वंयद्यपिपर्वतादेः। तथापिसा
ध्यतावच्छेदकसंबंधेनतत्प्रतियोग्यनधिकरणवृत्तित्वमस्त्येवेतिकथंप्रतियोगिव्यधिकरणाभावाप्रसि
द्धिरितिवाच्यम्॥ घटाभावेवर्ततेयोवह्न्यभावस्तस्यघटाभावात्मकतयाघटाभावस्यवह्निरपिप्रतियोगी॥
स६ तदधिकरणंचपूर्वक्षणादीनिक्रमेणप्रतियोगिव्यधिकरणाभावस्याप्रसिद्धिः। यद्दृतुघटाभावादौवह्न्यभावादिभि
न्नइत्युच्यते। तथापिधूमाभाववान्वह्न्यभावादित्यादौअव्याप्तिः। तत्रसाध्यतावच्छेदकसंबंधःस्वरूपसंबंधः एमः ४९

यो२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनसंवंधेनसर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वंहेत्वधिक
रणत्वंहेत्वधिकरणस्येति।तृतीयेतुकपिसंयोगाभाववान्आत्मत्वादित्यादावव्याप्तिःतत्रात्मवृत्तिःक
पि संयोगाभावाभावःकपिसंयोगस्तस्यगुणत्वात्तत्प्रतियोगितावच्छेदकंगुणसामान्याभावत्वमपि
तदवच्छिन्नानधिकरणत्वंचहेत्वधिकरणस्यात्मनइति।मैवम्।यादृशप्रतियोगितावच्छेदकावच्छि
न्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितावच्छेदकत्वस्यविवक्षितत्वात्॥ननुकालोघटवान्काल
परिमाणादित्यत्रप्रतियोगिव्यधिकरणाभावाप्रसिद्धिःहेत्वधिकरणस्यमहाकालस्यजगदाधारत
यासर्वेषामेवाभावानांसाध्यतावच्छेदकसंवंधेनकालिकविशेषणतयाप्रतियोग्यधिकरणत्वात्।अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. ४८ उ केचित् । महाकालभेदविशिष्टघटाभाववत्तत्रप्रतियोग्यधिकरणे । महाकालस्य घटाधारत्वेपि महा
कालभेदविशिष्टघटानाधारत्वात् ॥ महाकाले महाकालभेदाभावात् । वस्तुतस्तु प्रतियोगितावच्छेदकसं
बंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्ध
र्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यं व्यापकसामानाधिकरण्यं व्या
प्तिः । इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसंबंधेन घटाभावप्रतियोगिनो घटस्यानधिकर
णे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तत्प्रतियोगितायां कालिकसंबंधावच्छिन्न
त्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः ॥ ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्न रामः ४८

यत्संबंधः साध्यतावच्छेदकः यद्धर्मः साध्यतावच्छेदकधर्मः तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमुच्यते (यो २) तेन तदा समवायेन धोवह्न्यभाववत्त्वस्य
प्रतियोगितावच्छेदकसंबंधः समवायः तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव न प्रतियोगितावच्छेदकत्वस्य वह्नित्वमिति व्या
प्तिः स्यात् यदि च यत्संबंधावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशाप्रसिद्धसंयोगेन घटाभावस्य प्रतियोगितायां संयोगसंबंधावच्छि
न्नत्वसत्त्वाद् व्याप्तिः स्यादत उभयमुपात्तम् ॥३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वमप्रसिद्धम्॥ गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न॥ कंबुग्रीवादिमान्नास्तीति प्रतीत्या कंबुग्रीवादिम
त्त्वावच्छिन्नप्रतियोगिताकत्वविषयीकरणेन गुरुधर्मस्यापि अवच्छेदकत्वस्वीकारादिति संक्षेपः॥
यद्वा हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वावच्छिन्नवृत्तित्वं व्याप्तिः॥
अन्योन्याभावस्याव्याप्यवृत्तित्वात्तत्प्रतियोगिवैयधिकरण्यं न निवेश्यम्। यतोऽत्र लाघवमन्यत्सर्वं
पूर्ववदिति संक्षेपः। पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह॥ सिषाधयिषयाशून्या सिद्धिर्यत्र न तिष्ठति।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥ सिषाधयिषयेति। सिषाधयिषाविरहविशिष्टायाः सिद्धे
रभावः पक्षता तद्वान्पक्ष इत्यर्थः॥ सिषाधयिषामात्रं न पक्षता विनापि सिषाधयिषां घनगर्जितेन मे (

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पु
९८ घानुमानाःदतएवसाध्यसंदेहोपिनपक्षताविनापिसंदेहंघनगर्जितेनमेघानुमानात्सिद्धौसत्यामपि
सिषाधयिषासत्वेअनुमितिर्भवत्येव।अतःसिषाधयिषाविरहविशिष्टत्वंसिद्धौविशेषणं।तथाचयत्र
सिद्धिर्नास्तितत्रसिषाधयिषायांसत्यामसत्यामपिपक्षतायत्रसिषाधयिषास्तितत्रसिद्धौसत्यामसत्यां
चपक्षता।यत्रचसिद्धिरस्तिसिषाधयिषाचनास्तितत्रनपक्षतासिषाधयिषाविरहविशिष्टसिद्धेःस
त्वात्॥ननुयत्रपरामर्शानंतरंसिद्धिस्ततःसिषाधयिषातत्रसिषाधयिषाकालेपरामर्शनाशान्नानुमितिः
।यत्रसिद्धिपरामर्शसिषाधयिषाःक्रमेणभवंति।तत्रसिषाधयिषाकालेसिद्धेर्नाशात्प्रतिबंधकाभा पक्षः
वादेवानुमितिः।यत्रसिषाधयिषासिद्धिपरामर्शाःसन्तितत्रपरामर्शकालेसिषाधयिषैवनास्ति॥एवम ९८

सत्त्वापि सिद्धिकाले परामर्शकाले च न सिषाधयिषा॥ योग्यविभुविशेषगुणानां योगपद्यनिषेधात्तु ततः सि
षाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न॥ यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमान् इति प्रत्य
क्षं स्मरणं वा ततः सिषाधयिषा तत्र पक्षतासंपन्नये तद्विशेषणस्यावश्यकत्वादिति॥ अत्रेदं बोध्यम्॥ या
दृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिंगकानुमितिः तादृशतादृशसिषाधयिषाविरहविशिष्ट
सिद्ध्यभावः तल्लिंगकानुमितौ पक्षता॥ तेन सिद्धिपरामर्शसत्त्वे यत्किंचित् ज्ञानं जायतामितीच्छाया
मपि नानुमितिः॥ वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं वह्निज्ञानं जायता
मितीच्छायानुभवत्येव॥ एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमिति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु ःसिषाधयिषाविरहकाले यादृशसिद्धिसत्वे॥ नानुमितिस्तादृशी सिद्धिर्विशिष्य वक्तव्या॥ तेन पर्वतस्तेजस्वी
४९ पाषाणमयो वह्निमानिति ज्ञानसत्वेप्यनुमितेर्न विरोधः॥ परन्तु पक्षतावच्छेदकसामानाधिकरण्येन
साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्॥ पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदका
वच्छेदेन सिद्धिरेव प्रतिबंधिका॥ पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरो
धि॥ इदमनुबोध्यम्॥ यत्रायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानिति ज्ञानं तत्रासत्या
मनुमितीच्छायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनुमितिः॥ अतोऽनुमित्साविरहविशिष्टसमानविषय राम:
कप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातंत्र्येणाप्रतिबंधिका॥ एवं परामर्शानन्तरं प्रत्यक्षेच्छां वि ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नापक्षादिप्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री विषयकप्रत्यक्षे प्रतिबंधिके
तिसंक्षेपः ॥ हेतुप्रसंगेन हेत्वाभासान्निरूपयति ॥ अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ॥ का
६४ लात्ययापदिष्टश्च हेत्वाभासाश्च पंचधा ॥ ७२ ॥ तल्लक्षणन्तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधि
त्वं तत्त्वम् ॥ तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्तेदोषाः ॥ यद्विषयकत्वं
च यादृशविशिष्टविषयकत्वं बोध्यम् ॥ तेन बाधभ्रमस्यानुमितिविरोधित्वेपि नातिव्याप्तिः तत्र पर्व
तो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषः ॥ न च यत्र वह्न्यभावव्याप्यपाषाणमयत्ववा
न्पर्वत इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् ॥ तत्र वह्न्यभावव्याप्यवान्पक्ष इति वि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु. शिष्टस्याप्रसिद्धत्वादितिवाच्यम्॥इष्टापत्तेः॥अन्यथावाधस्याप्यनित्यदोषत्वापत्तेः॥तस्मान्नत्रवह्न्यभावव्या
५० प्यपाषाणमयत्ववानितिपरामर्शकालेवह्निव्याप्यधूमस्यनाभासत्वम्॥भ्रमादनुमितिप्रतिबंधमात्रं
॥हेतुस्तुनदुष्टः॥इत्थंचसाध्याभाववद्वृत्तिहेतुत्वादिकंदोषस्तद्वत्त्वंचहेतौयेनकेनापिसंबंधेनेतिनव्याः॥
परेतुयद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वंतद्वत्त्वंहेत्वाभासत्वम्॥सत्प्रतिपक्षेविरोधिव्याप्त्या
दिकमेवतथा॥तद्वत्त्वंहेतौज्ञानरूपसंबंधेन॥नचैवंवह्निमान्धूमादित्यादौवाधभ्रमस्यपक्षेसाध्या
भावविषयकत्वेनानुमितिविरोधित्वात्॥ज्ञानरूपसंबंधेनतद्वत्त्वस्यापिसत्वात्सद्धेतावपिवाधित एमः
त्वापत्तिरितिवाच्यम्॥तत्रज्ञानस्यसंबंधत्वाकल्पनाद्वत्रसत्प्रतिपक्षितइतिव्यवहारेणतत्कल्पनात्॥ ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र च बाधितव्यवहाराभावादित्याहुः। अनुमितिविरोधित्वं च अनुमिति तत्कारणीभूत ज्ञानान्यतर
विरोधित्वम्॥ तेन व्यभिचारिणि नाव्याप्तिः। दोषज्ञानं च यद्धेतु विषयकं तद्धेतुकानुमितेः प्रतिबंध
कम्॥ तेन एकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणानुमित्युत्पत्तेः तदभावाद्यनवगाहित्वाच्च व्यभिचा
रज्ञानस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति संक्षेपः॥ यादृशपक्षसाध्यहेतौ यावन्तो दोषास्ता
वदन्यतमत्वन्तत्र हेत्वाभासत्वम्॥ पंचत्वकथनं तु तत्संभवस्थलाभिप्रायेणेत्यपि वदन्ति॥ आद्यः सा
धारणस्तु स्यात् स्यादसाधारणोऽपरः॥ तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्॥ आद्य इति॥ एवं साधार
णाद्यन्यतमत्वं अनैकान्तिकत्वम्॥ साधारणः साध्यवदन्यवृत्तिः। तेन च व्याप्तिज्ञानप्रतिबंधः क्रियते॥

मु. ५१

असाधारणः साध्यासमानाधिकरणः॥ यथा शब्दोऽनित्यः शब्दत्वात् तेन साध्यसामानाधिकरण्यग्रहः प्र
तिबध्यते॥ अन्ये तु सपक्षावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान्॥ इत्थं च शब्दोऽनित्यः शब्दत्वा
दित्यादौ यदा पक्षे साध्यनिश्चयस्तदानासाधारण्यम्॥ तत्र हेतोर्निश्चयादित्याहुः॥ अनुपसंहारी च अ
त्यन्ताभावाप्रतियोगिसाध्यकादिः॥ अनेन व्यतिरेकव्याप्तिज्ञानप्रतिबंधः क्रियते॥ विरुद्धस्तु साध्यव्या
पकीभूताभावप्रतियोगी॥ अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः॥ सत्प्रतिपक्षे तु प्रतिहेतुः सा
ध्याभावसाधकः॥ अत्र हेतुं साधकः॥ अत्र हेतुरेक एवेति विशेषः साध्याभावसाधक एव साध्यसाधकत्वे रामः ५१
नोपन्यस्त इत्यंशक्तिविशेषो तथापकत्वाद्विशेषः॥ सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः॥ अग्रही

यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववत्
शब्दोऽनित्यः कार्यत्वात् घटवदिति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्रामारोपकसाधव्याप्यवत्वेनोपस्थितिकालीनतद्भावव्याप्यवत्वेनोपस्थितिविषयत्वथेत्यन्ये। अ
त्रपरस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधः फलम्॥ अत्रकेचित्। यथा घटाभावव्याप्य
वताज्ञाने विद्यमानेपि घटचक्षुःसंयोगे सति घटवत्व ज्ञानं जायते॥ यथा वसत्यपि पीतत्वाभावव्या
प्य शंखत्ववत्ताज्ञाने॥ सति पीतादिदोषे शंखः पीत इति धीः एवं कोटिद्वयव्याप्यदर्शनेपि कोटिद्वयस्य
प्रत्यक्षरूपः संशयो भवति॥ तथा सत्प्रतिपक्षस्थले संशयरूपानुमिति र्भवति॥ यत्र चैककोटिव्याप्य
दर्शनं तत्राधिकबलवत्तया द्वितीयकोटिभानप्रतिबंधो न संशयः। फलबलेन चाधिकबलत्वसमव
लाभावः कल्प्यत इत्याहुः॥ तन्न तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाद्बोधादेरनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु· दयात्॥लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यानाहार्यंतद्वत्ताज्ञानमात्रेतस्यप्रतिवंधकताल्लाघवा
५२ त्॥ननूपनीतभानविशेषेशाब्दबोधेचपृथक्प्रतिवंधकतागौरवात्॥तथाचप्रतिवंधकसत्वात्कथमनु
नुमितिः॥नहिलौकिकसन्निकर्षस्थलेप्रत्यक्षमिवसत्प्रतिपक्षस्थलेशंसंयाकारानुमितिःप्रामाणि
कीयेनानुमितिभिन्नत्वेनापिविशेषणीयं॥यत्रचकोटिद्वयव्याप्यवत्ताज्ञानंतत्रोभयत्राप्रामाण्यज्ञा
नात्संशयः॥नान्यथा॥अगृहीताप्रामाण्यकस्यैवविरोधिज्ञानस्यप्रतिवंधकत्वादिति॥असिद्धिस्तुआ
श्रयासिद्ध्याद्यन्यतमत्वंआश्रयासिद्धिःपक्षेपक्षतावच्छेदकस्याभावः॥यत्रकांचनमयःपर्वतोग्निमा राम:
निति साध्यतेतत्रपर्वतोनकांचनमयइतिज्ञानेविद्यमानेकांचनमयपर्वतेपरामर्शप्रतिवंधःफलम् ५२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः॥ अत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य
हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलम्॥ साध्याप्रसिध्यादयस्तु
व्याप्यत्वासिद्धिः॥ साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः। एतत्ज्ञाने जाते कांचनमयवह्निमा
नित्यादौ साध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबंधः फलम्॥ एवं हेतौ हेतुतावच्छेदकाभावः
साधनाप्रसिद्धिर्यथा कांचनमयधूमादित्यादौ अत्र हेतुतावच्छेदकविशिष्टस्य हेतोर्ज्ञानाभावात्तद्धेतु
व्याप्तिज्ञानादेरभावः फलम्॥ एवं वह्निमान्नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छे
दकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदंति॥ बाधस्तु पक्षे साध्याभावादिः॥ एतस्य चानुमितिप्रतिबंधः फलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गु
५२

तद्धर्मिकतदभावनिश्चयोलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यअनाहार्यतज्ज्ञानमात्रेविरोधी
ति।नतुसंशयसाधारणंपक्षेसाध्यसंसृष्टत्वज्ञानमनुमितिकारणंतद्विरोधितयाचबाधसत्प्रतिपक्ष
योर्हेत्वाभासत्वमितियुक्तम्।साध्यसंशयादिकंविनाप्यनुमित्युत्पत्तेश्च।एवंसाध्याभावज्ञानप्रमात्व
ज्ञानमपिनप्रतिबंधकम्।प्रमाणाभावाज्ञौर्याच्च।अन्यथासत्प्रतिपक्षादावपितदभावव्याप्यज्ञा
नेप्रमात्वविषयकत्वेनप्रतिबंधकतापत्तेः।किंतुभ्रमत्वज्ञानानास्कंदितबाधबुद्धेःप्रतिबंधकता।तत्र
भ्रमत्वशंकाविघटनेनप्रामाण्यज्ञानंक्वचिदुपयुज्यते।नचबाधस्थलेपक्षेहेतुसत्त्वेव्यभिचारःपक्षे रामः
हेत्वभावेस्वरूपासिद्धिरेवदोषइतिवाच्यम्।बाधज्ञानस्यव्यभिचारज्ञानादेर्भेदात्।किंचयत्रपरामर्शा ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्तरंबाधउद्भिस्तत्रव्यभिचारज्ञानादेरकिंचित्करत्वात्बाधस्यानुमितिप्रतिबंधकत्वंवाच्यम्।एवंयत्रो
त्पत्तिक्षणावच्छिन्नघटादौगंधव्याप्यपृथिवीत्ववत्ताज्ञानम्।तत्रबाधस्यैवप्रतिबंधकत्वंवाच्यम्॥न
चपक्षेघटेगंधसत्वात्कथंबाधइतिवाच्यम्॥पक्षतावच्छेदकदेशकालावच्छेदेनतदभावस्यानुभवसि
द्धत्वादिति॥बाधतद्व्याप्यभिन्नायेहेत्वाभासास्तद्व्याप्याअपितन्मध्यएवान्तर्भवंति॥अन्यथाहेत्वाभासा
धिक्यप्रसंगात्।बाधव्याप्यसत्प्रतिपक्षोभिन्नएवस्वातंत्र्येणानुनिनाशप्रगुपदेशात्सत्प्रतिपक्षव्या
प्यस्तुनप्रतिबंधकइति।यःसपक्षइतिसपक्षविपक्षवृत्तिःसाधारणइत्यर्थः।सपक्षःसाध्यवान्।विपक्षः
साध्यवद्भिन्नः॥विरुद्धवारणायसपक्षवृत्तित्वमित्युक्तम्॥वस्तुतोविपक्षवृत्तित्वमेववाच्यम्।विरुद्धस्य

१ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षसपक्षविपक्षाः साधारणासाधारणानुपसंहारिणः॥ १

सु॰ ५४ साधारणत्वेपिदूषकतावीजस्यभिन्नतयातस्यपार्थक्यात्॥ यत्तुपक्षसपक्षादीति॥ सपक्षविपक्षाभ्यांव्यावृ
त्तइत्यर्थः सपक्षः साध्यवत्तयानिश्चितः॥ विपक्षः साध्यशून्यतयानिश्चितः॥ शब्दोनित्यःशब्दत्वादित्यादौ
यदाशब्देऽनित्यत्वस्यसंदेहस्तदासपक्षत्वंघटादीनामेवनत्वावृत्तंचशब्दत्वमिति॥ तदसाधारणम्॥ यदा १२
शब्देऽनित्यत्वनिश्चयस्तदानासाधारणम्॥ इदन्तुप्राचांमतेन॥ नवीनमतन्तुपूर्वमुक्तम्॥ तथैवेति॥ तथै
वानुपसंहारी॥ केवलान्वयिपक्षकः सर्वमभिधेयंप्रमेयत्वादित्यादौसर्वस्यैवपक्षत्वात्सामानाधिकर
ण्यग्रहस्थलान्तराभावान्नानुमितिः॥ इदन्तुनसम्यक्पक्षैकदेशेसहचारग्रहेपिक्षतेरभावात्॥ अनु रत्न॰ ५४
वासहचाराग्रहस्तावताप्यज्ञानरूपासिद्धिरेवनहेत्वाभासत्वंतस्य॥ तथापिकेवलान्वयिसाध्यकत्वंतत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ पक्षासिद्धिर्यत्रपक्षोभवेन्मणिमयोगिरिः

मित्युक्तम्॥ यःसाध्यवतिनैवास्तिसविरुद्धउदाहृतः॥ एवकारेणसाध्यवत्तावच्छेदेनहेत्वभावोबोधि
तः। तथाचसाध्यव्यापकीभूताभावप्रतियोगित्वन्तदर्थः। असिद्धिंविभजते। आश्रयासिद्धिरिति। आश्रया
सिद्धिराद्यास्यात्स्वरूपासिद्धिरप्यथ। व्याप्यत्वासिद्धिरपरास्यादसिद्धिरतस्त्रिधा॥ पक्षासिद्धिरिति॥ आश्र
यासिद्धिरित्यर्थः। अपरास्वरूपासिद्धिरित्यर्थः। नीलधूमादिकइति॥ नीलधूमत्वंगुरुतयानहेतुतावच्छे
दकम्॥ स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैवव्याप्यतावच्छेदकत्वात्धूमप्राग
भावत्वसंग्रहायसमानाधिकरणेति। विरुद्धयोरिति॥ कपिसंयोगकपिसंयोगाभावव्याप्यवत्तापरामर्शे
पिनसत्प्रतिपक्षितत्वम्। अतउक्तंविरुद्धयोरिति। तथाचस्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्श

३ व्याप्यत्वासिद्धिरपरानीलधूमादिकेभवेत् ४ विरुद्धयोःपरामर्शेहेत्वोःसत्प्रतिपक्षता ४

मुः कालीनसाध्यव्याप्यवत्तापरामर्श इत्यर्थः।साध्यशून्योयत्रपक्षस्त्वसौबाध उदाहृतः।।उत्पत्तिकालीनघटे
५५ गन्धादिर्यत्रसाध्यते।साध्यशून्यइति।।पक्षःपक्षतावच्छेदकविशिष्टइत्यर्थः।तेनघटेगंधसत्वेऽपिनक्षतिः
घो २ ।।एवंमूलावच्छिन्नोहंसःकपिसंगीत्यत्रापिबोध्यम्।। ।।इत्यनुमाननिरूपणंसमाप्तम्।। ।।उप
मितिंनिरूपयति।।ग्रामीणस्यप्रथमतःपश्यतोगवयादिकम्।।सादृश्यधीर्गवादीनांयास्यात्साकरणं
मतम्।।वाक्यार्थस्यातिदेशस्यस्मृतिर्व्यापारउच्यते।।गवयादिपदानांतुशक्तिधीरुपमाफलम्।।यत्रारण्य
केनकेनचिद्ग्रामीणायोक्तंगोसदृशोगवयपदवाच्यइति।।पश्चाद्ग्रामीणेनक्वचिदरण्यादौगवयो मुः
दृष्टस्तत्रगोसादृश्यदर्शनंयज्जायते।।तदुपमितिकरणंतदनन्तरंगोसदृशोगवयपदवाच्यइति ५५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारः। तदनंतरं तत्र गवयो गवयपदवाच्य इति ज्ञानं यज्जायते
तदुपमितिः॥ न त्वयं गवयपदवाच्य इत्युपमितिः॥ गवयांतरे शक्तिग्रहाभावप्रसंगात्॥ ॥इत्युपमिति
निरूपणम्॥ ॥शाब्दबोधप्रकारं दर्शयति। पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं त
त्र शक्तिधीः सहकारिणी। पदज्ञानं त्विति। न तु ज्ञायमानं पदं करणं पदाभावेपि मौनिश्लोकादौ शाब्दबो
धात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थि
तावपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्। अन्यथा घटपदात् समवायसंबंधेनाकाशस्म
रणे जाते आकाशस्यापि शाब्दबोधापत्तेः॥ वृत्तिश्च शक्तिलक्षणान्यतरसंबंधः। अत एव शक्तिज्ञानस्योपयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गः। पूर्वं शक्तिग्रहाभावे पदज्ञानेपि तत्संबंधेन स्मरणानुपपत्तेः। पदज्ञानस्य हि संबंधिज्ञानविधया पदार्थस्मा
५८ रकत्वम्। शक्तिश्च पदेन सहार्थस्य संबंधः॥ सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा। आधुनिके ना
म्नि शक्तिरस्त्येव एकादशे ऽहनि पिता नाम कुर्य्यादितीश्वरेच्छायाः सत्वात्॥ आधुनिकसंकेते तु न शक्तिरि
ति संप्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः किं त्विच्छैव तेनाधुनिकसंकेतेपि शक्तिरस्त्येवेत्याहुः। शक्तिग्रह
स्तु व्याकरणादितः। तथा हि शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च॥ वाक्यस्य शेषाद्वि
वृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्तु राम:
सति बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्या ५८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदान्वयः। सा गौरवान्नज्यते। किन्तु कृतौ शक्तिर्लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते। न च कर्तुरनभि
धानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्॥ कर्तृगतसंख्यानभिधानस्य तत्र तन्त्रत्वात्। संख्याभिधान
योग्यस्य कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः कर्मत्वाद्यन्यस्येतरविशेषणत्वतात्पर्याविषयत्वम
र्थः। तेन चैत्र इव मैत्रो गच्छतीत्यत्र न चैत्रे संख्यान्वयः यत्र कर्मत्वादौ न विशेषणत्वे तात्पर्यन्तत्र कारणाय प्र
थमान्तेति॥ यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः। तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वार
णं। स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयं दलम्। तस्यद्वितीयान्तोपस्थाप्यत्वाद्वारणम्। एवं व्यापारेपि
न शक्तिर्गौरवात्। रथो गच्छतीत्यादौ व्यापारे आश्रयत्वे वा लक्षणा जानातीत्यादावाश्रयत्वे नश्यतीत्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. प्रतियोगित्वेनिरूढलक्षणा।उपमानाद्यथाशक्तिग्रहस्तथोक्तम्।एवंकोशादपिशक्तिग्रहःसतिबाधकेक्वचि
५७ त्त्यज्यतेपि।यथानीलादिपदानांनीलरूपादौनीलादिविशिष्टेचकोशेनशक्तिर्व्युत्पादिता।तथापिलाघवान्नी
लादौशक्तिर्नीलादिविशिष्टेतुलक्षणा।एवमाप्तवाक्यादपि।यथाकोकिलःपिकपदवाच्यइत्यादिशब्दात्पिक
पदादिशब्देशक्तिग्रहः।एवंव्यवहारादपि।यथाप्रयोजकवृद्धेनघटमानयेत्युक्तंतच्छ्रुत्वाप्रयोज्यवृद्धेनघटआ
नीतस्तदवधार्यपार्श्वस्थोबालोघटानयनरूपंकार्यंघटमानयेतिशब्दप्रयोज्यमित्यवधारयति।ततश्चघटंनय ज्य५
पटमानयेत्यादिवाक्यादावापोद्वापाभ्यांघटादिपदानांकार्यान्वितघटादौशक्तिंगृह्णाति।इत्थंचभूतलेनी एनः
लोघटइत्यादिशब्दान्नशाब्दबोधः।घटादिपदानांकार्यान्वितघटादिबोधेसामर्थ्यावधारणात्।कार्यतावोधंप्र ५७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिच लिङ्गादीनां सामर्थ्यं तदभावान्न शाब्दबोध इति केचित्। तन्न प्रथमतः कार्य्यतान्विते घटादौ शक्त्यव
धारणेपि लाघवेन पश्चात्तस्य परित्यागोचितत्वात्। अत एव चैत्रपुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ सुखप्र
साद मुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्द
मवधारयति। तथा च व्यभिचारान्न कार्य्यान्विते शक्तिः। न च तत्र तं पश्येत्यादिशब्दान्तरमध्याहार्य्यं माना
भावात्। चैत्रपुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च। इत्थं च लाघवादन्विते घटेपि शक्तिं त्यक्त्वा घटपदस्य घ
टमात्रे शक्तिमवधारयन्ति। एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घ
शूकविशिष्टे आर्य्याणां प्रयोगः। कंगौ च म्लेच्छानाम्। तत्र हि यत्रान्या ओषधयो म्लायन्ते। तत्रैते मोदमाना

सु.
५८

पवास्तिष्ठंति। वसंतेसर्वसस्यानांजायतेपत्रशातनम्॥ मोदमानाश्चतिष्ठंतियवाःकणिशशालिनइतिवा
क्यशेषाद्दीर्घशूकेशक्तिर्निर्णीयते। कंगौतुशक्तिभ्रमात्प्रयोगः। नानाशक्तिकल्पनेगौरवात्। हर्य्यादिपदे
तुविनिगमकाभावान्नानाशक्तिकल्पनम्। एवंविवरणादपिशक्तिग्रहः। विवरणंतुतत्समानार्थकपदां
तरेणतदर्थकथनम्। यथाघटोऽस्तीत्यस्यकलशोऽस्तीत्यनेनविवरणात्घरपदस्यकलशेशक्तिग्रहः। ए
वंपचतीत्यस्यपाकंकरोतीत्यनेनविवरणादाख्यातस्ययत्नार्थकत्वंकल्प्यते। एवंप्रसिद्धपदस्यसांनिध्या
दपिशक्तिग्रहः। यथाइहसहकारतरौमधुरंपिकोरौतीत्यादौपिकपदस्यशक्तिग्रहइति। तत्रजातावेवश
क्तिर्नतुव्यक्तौव्यभिचारादानंत्याच्च। व्यक्तिंविनाजातिभानस्यासंभवाद्व्यक्तेरपिभानमितिकेचित्। तन्न॥ एनः ५८

क३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिंविनाव्यक्तिभानानुपपत्तेः।नचव्यक्तौलक्षणा।अनुपपत्तिप्रतिसंधानंविनापिव्यक्तिबोधात्।नचव्य
क्तिशक्तावानंत्यम्।सकलव्यक्तावेकस्याःशक्तेःस्वीकारात्।नचाननुगमः।गोत्वादेरेवानुगमकत्वात्।किं
चगोःशक्येतिशक्तिग्रहोयदितदाव्यक्तौशक्तिः।यदितुगोत्वंशक्यमितिशक्तिग्रहस्तदागोत्वप्रकारक
पदार्थस्मरणंशाब्दबोधश्चनस्यात्।समानप्रकारकत्वेनशक्तिज्ञानस्यपदार्थस्मरणंशाब्दबोधंप्रतिवहे
तुत्वात्।किंचगोत्वेयदिशक्तिस्तदागोत्वत्वंशक्यतावच्छेदकंवाच्यम्।गोत्वत्वंतुगवेतरासमवेतत्वेसति
सकलगोसमवेतत्वम्।तथाचगोव्यक्तीनांशक्यतावच्छेदकेऽनुप्रवेशात्तवैवगौरवम्।तस्मात्तत्तज्जात्या
कृतिविशिष्टतद्व्यक्तिबोधानुपपत्त्याकल्प्यमानाशक्तिर्जात्याकृतिविशिष्टव्यक्तौविश्राम्यति।शक्तंपदम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु
पर

तच्चतुर्विधम्। क्वचिद्यौगिकम्। क्वचिद्रूढम्॥ क्वचिद्योगरूढम्। क्वचिद्यौगिकरूढं च। यत्रावयवार्थ एव बुध्य
ते। तद्यौगिकम्। यथा पाचकादिः। यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्।
यथा गोपदं मण्डलादिपदम्। यत्र त्ववयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्। यथा पं
कजादिपदम्। तथा हि पंकजपदं अवयवशक्त्या पंकजनिकर्तृरूपमर्थं बोधयति। समुदायशक्त्या
च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलावयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्। रूढिज्ञान
स्य केवलयौगिकार्थज्ञानप्रतिबंधकत्वादिति प्राञ्चः। वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थ
पंकजनिकर्तुरन्वयो भवति सान्निध्यात्। यत्र रूढ्यर्थबाधः प्रतिसंधीयते। तत्र लक्षणया कुमुदादेर्बोधः

ततः
पर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्रकुमुदत्वेनरूपेणावबोधेनतात्पर्यज्ञानंपद्मत्वस्यचबाधःतत्रावयवशक्तिमादेणनिर्वाहइत्याकूत
यत्रतुस्थलपद्मादाववयवार्थबाधः॥तत्रसमुदायशक्त्यापद्मत्वेनरूपेणावबोधः॥यदिस्थलपद्मविजा
तीयमेवतदालक्षणैव।यत्रतुयौगिकार्थरूढ्यर्थयोःस्वातंत्र्येणावबोधस्तद्यौगिकरूढम्॥यथोद्भिदादि
पदम्॥तत्रउद्भेदनकर्तारस्तरुगुल्मादयोपिबुध्यंते।रूढ्यायागविशेषोपीति।लक्षणाशक्यसंबंधस्ता
त्पर्यानुपपत्तितः॥गंगायांघोषइत्यादौगंगापदस्यशक्यार्थेप्रवाहरूपेघोषस्यान्वयानुपपत्तिः।तात्प
र्यानुपपत्तिर्वाप्रतिसंधीयते॥तत्रलक्षणयातीरस्यबोधः।साचशक्यसंबंधः।तथाहि।शक्यार्थरूपसंबं
धस्यतीरेगृहीतत्वात्तीरस्यस्मरणंततःशाब्दबोधः॥परंतुयत्रान्वयानुपपत्तिर्लक्षणाबीजंस्यात्।तदा

मु. ९०

यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात् यष्टिप्रवेशान्वयस्यानुपपत्तेरभावात्॥ तेन प्रवेशे भोजनतात्पर्य्या
नुपपत्त्या यष्टिधरे लक्षणा॥ एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा॥ इय
मेवाजहत्स्वार्थलक्षणोच्यते एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्॥ यदि चान्वयानुपपत्ति
र्लक्षणाबीजं स्यात्तदा क्वचिद्गंगापदस्य तीरे क्वचिद्घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात्॥
इदन्तु बोध्यम्॥ शक्यार्थसंबंधो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः॥ यदि तु गंगातीर
त्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्॥ अत एव लक्ष्यतावच्छेदके न लक्षणा तत्प्रकारकपदार्थ
बोधस्य तत्र लक्षणां विनाप्युपपत्तेः॥ परं त्वेवं क्रमेण शक्यतावच्छेदकेपि शक्तिर्न स्यात्॥ तत्प्रकारकपदा

एमः ९०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थस्मरणंप्रतिततत्पदस्यसामर्थ्यमित्यस्यसुवचत्वादितिविभावनीयम्।यत्रतुशक्यार्थस्यपरंपरासं
वंधरूपालक्षणासालक्षितलक्षणेत्युच्यते।यथाद्विरेफादिपदेरेफद्वयसंवंधोभ्रमरपदेज्ञायतेभ्रमर
पदस्यचसंवंधोभ्रमरेज्ञायतेतत्रलक्षितलक्षणा।किंतुलाक्षणिकंपदंनानुभावकंलाक्षणिकार्थस्यशा
ब्दवोधेतुपदांतरंकारणम्।शक्तिलक्षणान्यतरसंवंधेनेतरपदार्थान्वितस्वशक्यार्थस्यशाब्दवोधंप्रति
पदानांसामर्थ्यावधारणात्।वाक्येतुशक्तेरभावाच्छक्यसंवंधरूपालक्षणापिनास्ति।यत्रतुगभीरायांन
द्यांघोषइत्युक्तंतत्रनदीपदस्यनदीतीरेलक्षणागभीरपदार्थस्यनद्यासहाभेदान्वयः॥कश्चिदेकदेशा
न्वयस्यापिस्वीकृतत्वात्।यदितत्रैकदेशान्वयोनस्वीक्रियतेतदानदीपदस्यगभीरनदीतीरेलक्षणा।ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु·
९१

भीरपदं तात्पर्यग्राहकम्॥ बहुव्रीहावप्येवम्। तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते तदा गोप
दस्य गोमति लक्षणा। गवि चित्राभेदान्वयः। यदि त्वेकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोमति
लक्षणा। चित्रपदन्तात्पर्यग्राहकम्। तत्पुरुषे तु पूर्वपदे लक्षणा। तथाहि। राजपुरुषादिपदे राजपदार्थेन
पुरुषादिपदार्थस्य साक्षान्न भेदेनान्वयः। निपातातिरिक्तनामार्थयोः साक्षात् भेदेनान्वयबोधस्याव्युत्पन्न
त्वात्॥ अन्यथा राजा पुरुष इत्यादावपि तथान्वयबोधः स्यात्। घटो न पट इत्यादौ घटपटपदाभ्यां नञर्थस्य सा
क्षादेवान्वयात् निपातातिरिक्तेति। नीलो घट इत्यादौ नामार्थयोरभेदसंबंधेनान्वयादर्शनेनेति। न च राजपुरुष
इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्। अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्माद्राजपदादौ राज

राम:
९१

संवंधिनिलक्षणा।तस्यपुरुषेणसहाभेदान्वयः।द्वंद्वेतुधवखदिरौछिन्धीत्यादौधवस्यखदिरस्यविभक्त्यर्थ
छित्वप्रकारेनयावुध्यते।तत्रनलक्षणान्तचसाहित्येलक्षणेतिवाच्यम्।साहित्यस्यान्येपिद्वंद्वदर्शनात्।न
चैकक्रियान्वयित्वरूपंसाहित्यमस्तीतिवाच्यम्।क्रियाभेदेपिधवखदिरौपश्यछिन्धीत्यादौतथादर्शनात्॥
साहित्यस्याननुभवाच्च।अतएवराजपुरोहितौसायुज्यकामौयजेयातामित्यत्रलक्षणाभावाद्द्वंद्वएवआश्रीय
ते।तस्मात्साहित्यादिकंनार्थः।किंतुवास्तवोयत्रभेदस्तत्रद्वंद्वः।नचनीलघटयोरभेदइत्यत्रकथमितिवाच्यं
।तत्रनीलपदस्यनीलत्वेघटपदस्यघटत्वेलक्षणाअभेदइत्यस्याश्रयाभेदइत्यर्थात्।समाहारद्वंद्वेतुयदिस
माहारोप्यनुभूयतइत्युच्यते।तदाहिनकुलमित्यादौपरपदेअहिनकुलसमाहारेलक्षणापूर्वपदंतात्पर्यग्रा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हकम् । न च भेरीमृदंगं वादयेत्यत्र कथं समाहारस्यापेक्षाबुद्धिविशेषरूपस्य वादनासंभवादिति वाच्यम् । परं
८२ परासंबंधेन तदन्वयात् । एवं पंचकूल्यां त्यादावपि परे तु अ. हिनकुलमित्यादावहिर्नकुलस्य बुध्यते । प्रत्येक
स्याश्रयप्रतियोगिकत्वसंबंधेन चान्वयः समाहारसंज्ञा चयत्रैकत्वन्नपुंसकत्वं च [illegible] प्राणितूर्येत्यादिसूत्रे
णोक्तं तत्रैव अन्यत्र एकवचनमसाक्षिमाकुपितरौ श्वसुरौ इत्यादौ पितृपदे जनकदंपत्योः श्वशुरपदे स्त्रीजन
कदंपत्योर्लक्षणा एवमन्यत्रापि घटाइत्यादौ न लक्षणा घटत्वेन रूपेण नानाघटोपस्थितिसंभवात् कर्म
धारयस्थले तु नीलोत्पलमित्यादावभेदसंबंधेन नीलपदार्थ उत्पलपदार्थे प्रकारस्तत्र न लक्षणा अत एव
निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषो लक्षणापत्तेः किन्तु कर्मधारयो लक्षणाया अभावात् । न च निषा समाः ८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दस्यसंकरजातीयस्यवेदेनधिकारात्।याजनासम्भवइतिवाच्यम्।निषादस्यविद्याप्रयुक्तेस्ततएवक
ल्पनीयत्वात्।लाघवेनसुखार्थान्वयेतदनुपपत्त्याकल्पनायाःफलमुखत्वतयाअदोषत्वादिति।उपकुंभं
अर्द्धपिप्पलीत्यादौपरपदेतत्संबंधिनिलक्षणा।पूर्वपदार्थप्रधानतयावान्वयबोधइति।इयंचसमा
सेनक्वापिशक्तिःपदशक्त्यैवनिर्वाहादिति।आसत्तियोग्यताकांक्षातात्पर्यज्ञानमिष्यते।कारणम्आस
त्तिज्ञानंयोग्यताज्ञानंआकांक्षाज्ञानंतात्पर्यज्ञानंचशाब्दबोधेकारणम्।तत्रासत्तिपदार्थमाह।सन्निधा
नंतुपदस्यासत्तिरुच्यते।अन्वयप्रतियोगिपदयोरव्यवधानमासत्तिःतज्ज्ञानंशाब्दबोधेकारणंकविद्धव
हितेव्यवधानभ्रमात्शाब्दबोधःवस्तुतस्त्वव्यवधानज्ञानस्यानपेक्षितत्वात्यत्पदार्थस्ययत्पदार्थेनसह

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वयोपेक्षितस्तयोः पदयोरव्यवधानेनोपस्थितिः शाब्दबोधेकारणम् । तेन गिरिर्भुक्तमग्निमान्देवदत्तेने
६३ त्यादौ न शाब्दबोधः । अत एव श्लोकादौ व्यवहितानामव्यवधानेनोपस्थितिरासत्तिस्तस्मादेवान्वयबोधः । नी
लो घटो द्रव्यं पट इत्यत्र यदा नीलपटयोरन्वयो विवक्षितस्तदा नीलघटयोर्नासत्तिः । भ्रमाच्छाब्दबोधमात्रं ता
त्पर्यगर्भा नासत्तिः । अयं च आसत्तेरुपस्थितिरूपत्वान्न ज्ञानस्याहेतुत्वात् आसत्तिभ्रमाच्छाब्दभ्रमाभावेपि
न क्षतिः । यत्र छत्री कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्य स्मरणेन पूर्वपदस्मरणस्य नाशादव्य
वधानेनोत्तरपदस्मरणासंभव इति चेन्न । प्रत्येकपदानुभवजन्यसंस्कारैश्चरमं [illegible] तावत्पदविषयकस्म
रणस्याव्यवधानेनोत्पत्तेः । नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि संभवात् । ताव ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



त्पदसंस्कारसहितचरमवर्णज्ञानस्योबोधकत्वात्। कथमन्यथानानावर्णात्मकपदस्मरणम्। परन्तुतावत्प
दार्थानांस्मरणादेकदैवखलेकपोतन्यायात् तावत्पदार्थानांक्रियाकर्मभावेनान्वयरूपःशाब्दबोधोभ
वतीतिकेचित्। वृद्धायुवानःशिशवःकपोताःखलेयथामीयुगपत्पतंति। तथैवसर्वेयुगपत्प दार्थाःपरस्परे
णान्वयिनोभवंति। परेतुयथाकांक्षितंयोग्यंसंनिधानंप्रपद्यतेतेनतेनान्वितःस्वार्थःपदैरेवावगम्यतेतथा
चरखण्डवाक्यार्थबोधानन्तरंतथैवपदार्थस्मृत्यामहावाक्यार्थबोधइत्याहुः। एतेनतावद्वर्णाभिव्यंग्यंपदस्फो
टोपिनिरस्तः। तत्रवर्णसंस्कारसहितचरमवर्णोपलंभेनतत्तद्व्यंजकेनैवोपपत्तेरिति। इदन्तुबोध्यम्। यत्रद्वारमि
त्युक्तेतत्र पिधेहीत्यादिपदस्यज्ञानादेवबोधः। नतुपिधानादिरूपार्थज्ञानात्पदजन्यनतत्पदार्थोपस्थितेस्तत्र



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उ. शाद्ववोधहेतुत्वात्। किंच क्रियाकर्मपदानान्तेन तेनैव सहसाकांक्षितत्वात्तेन क्रियापदं विना कथं वोधः स्यात्
६४ । तथा पुष्येभ्य इत्यादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदस्याध्याहार आवश्यकः। योग्यतां निर्व
क्ति। पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तितेति। एकपदार्थे अपरपदार्थसंवंधो योग्यतेत्यर्थः। तज्ज्ञानाभावा
च्च वह्निना सिंचतीत्यादौ न शाद्ववोधः। नन्वेतस्या योग्यताया ज्ञानं शाद्ववोधात्प्राक्सर्वत्र न संभवति वाक्यार्थ
स्यापूर्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताज्ञानस्य सं
भवात्। नव्यास्तु योग्यताज्ञानं न शाद्ववोधे कारणं वह्निना सिंचतीत्यादौ सेके वह्निकरणत्वाभावरूपा योग्य गम:
तानिश्चयेन प्रतिवंधान्न शाद्ववोधः। तदभावनिश्चयस्यालौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे ६४

प्रतिबंधकत्वाच्छाब्दबोधं प्रमपि प्रतिबंधकत्वं सिद्धम्। योग्यताज्ञानविलंबाच्च शाब्दबोधविलंबो। सिद्ध इत्या
हुः। आकांक्षां निर्वक्ति। यत्पदेन विना यस्याननुभावकता भवेत्। आकांक्षेति। येन पदेन विना यत्पदस्या
कांक्षा वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्याचारितार्थ्यं परन्तु घटकर्मताबोधं प्रति घटपदो
त्तरद्वितीयारूपाकांक्षाज्ञानं कारणं तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः अयमेति पुत्रो
राज्ञः पुरुषोपसार्य्यतामित्यादौ पुत्रेण सह राज्ञः पदस्य तात्पर्य्यग्रहात्तेनैवान्वयबोधः पुरुषेण सह तात्प
र्य्यग्रहे तु तेन सहान्वयः स्यादेवं तात्पर्य्यं निर्वक्ति। वक्तुरिच्छेति। यदि तात्पर्य्यज्ञानं कारणं न स्यात्तदा सैंधव
मानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकाणां प्रकरणादीनां शाब्दबोधे

वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्॥२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श कारणत्वमस्त्वितिवाच्यम्।तेषामननुगमात्।तात्पर्य्यज्ञानजनकत्वेनतेषामनुगमेतात्पर्य्यज्ञानमेव·
८५ लाघवात्।कारणमस्तु।इत्थंचवेदस्थलेपितात्पर्य्यज्ञानार्थमीश्वरःकल्प्यते।नचतत्राध्यापकतात्पर्य्य
ज्ञानंकारणंमितिवाच्यम्॥सर्गादावध्यापकाभावात्।नचप्रलयएवनास्तिकुत्रसर्गादिरितिवाच्यम्
।प्रलयस्यागमप्रतिपाद्यत्वात्।इत्थंचशुकवाक्येऽपीश्वरतात्पर्यज्ञानंकारणं।विसंवादिशुकवाक्येतुशि
क्षयितुरेवतात्पर्य्यज्ञानंकारणम्।अन्येतुनानार्थादौकचिदेवतात्पर्यज्ञानंकारणंतथाचशुकवाक्येविनै
वतात्पर्य्यज्ञानंशाब्दबोधः।वेदेत्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः॥इतिशब्दपरिच्छे राम:
दःसमाप्तः॥ ॥पूर्वमनुभवस्मरणभेदाद्बुद्धेर्द्वैविध्यमुक्तंतत्रानुभवप्रकारादर्शिताःसुगमतयास्मरणं ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नदर्शिनं। तत्र पूर्वोनुभवः कारणम्। अत्र केचिदनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन। अन्यथा स्मरणोत्तरं
स्मरणं न स्यात् अनुभवस्य नष्टत्वात्। समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्म
रणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यते इत्याहुः। तन्न। यत्र समूहालंबनोत्तरं घटादीनां क्रमेण स्मरण
मजनिष्ट सकलविषयकस्मरणं माभूत् तत्र फलस्य संस्कारनाशकत्वाभावात्तत्कारकालस्य रोगस्य चर गा ४
मफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः। न च पुनः पुनः स्मरणात् दृढ
तरसंस्कारानुपपत्तिः। दृढत्वबोधकसमवधानस्यादृष्टपदार्थत्वात्। न च विनिगमनाविरहादेव ज्ञानत्वे
नापि जनकत्वं स्यादिति वाच्यम्। विशेषधर्मे व्यभिचाराज्ज्ञाने सामान्यधर्माणामन्यथासिद्धत्वात्। घटं प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पु दणाऽस्पदणाऽत्वेनद्रव्यत्वेनरूपेणानकारणत्वम्।अन्त्यांतरालिकस्मरणानांसंस्कारनाशकत्वसंशयाद्यभिचा
८८ न्संशयइतिवाच्यम्।अनन्तसंस्कारतन्नाशकल्पनापत्त्याचरमस्मरणस्यैवसंस्कारनाशकत्वकल्पनेनव्य
भिचारसंशयाभावात्।इदानींक्रमप्राप्तंमनोनिरूपयति।साक्षात्कारइति।एतेनमनसिप्रमाणंदर्शितं।
सा।४ तथाहिसुखादिसाक्षात्कारःसकरणकः।जन्यसाक्षात्कारत्वाच्चाक्षुषसाक्षात्कारवदित्यनुमानेनमनसःक
रणत्वसिद्धिः।नचैवंदुःखादिसाक्षात्कारण मपिकरणान्तराणिस्युरितिवाच्यंलाघवादेकस्यैवसकलसा
क्षात्कारकरणतयासिद्धेः।एवंसुखादीनामसमवायिकारणसंयोगाश्रयतयामनःसिद्धिर्बोध्या।मनसो राम:
ऽणुत्वेप्रमाणमाह।अयौगपद्यादिति।ज्ञानानांचाक्षुषरासनादीनामयौगपद्यंएककालोत्पत्तिर्नास्तीत्य ८८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञमवसिद्धम्। तद्यनानेंद्रियाणांसत्यपिविषयसंन्निधानेयत्संबंधादेकेनेंद्रियेणज्ञानमुत्पद्यतेयद्‌संबं
धाच्चत्वगादिभिःपरैर्ज्ञानंनोत्पद्यतेतन्मनः। तस्यविभुत्वेवासंनिधानंनसम्भवतीतिनविभुर्मनः। नचत
दानीमदृष्टविशेषाद्बोधविलंबादेवज्ञानविलंबइतिवाच्यम्। तथासतिचक्षुरादीनामप्यकल्पनापत्तेः
। नचदीर्घशष्कुलीभक्षणेनानासमवधानभाजांचकथमेकदानानेन्द्रियजन्यज्ञानमितिवाच्यम्। मनसो
तिलाघवाद्भुरितिनानेन्द्रियसंबन्धान्नानाज्ञानोत्पत्त्याउत्पलशतपत्रभेदादाविवयौगपद्यप्रत्ययस्यभ्रान्त
त्वात्। नचमनसःसंकोचविकाशशालित्वादुभयोत्पत्तिरस्त्वितिवाच्यम्॥ नानावयवतन्त्राशादिकल्पनेगौ
रवाल्लाघवान्निरवयवस्यैवाणुरूपस्यमनसःकल्पनादितिसंक्षेपः॥ ॥इतिद्रव्यपदार्थव्याख्यासमाप्ता॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथद्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।१

मु॰ ६८ द्रव्यं निरूप्य गुणान्निरूपयति।अथेत्यादिना।गुणत्वजातौ किं मानमिति चेत् इदं द्रव्यकर्मभिन्ने सामान्यवति
याकारणता सा किंचिद्धर्मावच्छेद्या निरवच्छेद्यकारणताया असम्भवात्।नहि रूपत्वादिकं सत्तावा तत्रावच्छे
दिकान्यूनातिरिक्तदेशवृत्तित्वादतश्चतुर्विंशत्यनुगतं वाच्यं।तदेव गुणत्वमिति।द्रव्याश्रिता इति।यद्यपि द्र
व्याश्रितत्वं न लक्षणम्।कर्मादावतिव्याप्तेस्तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः
।भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं न द्रव्याव गुणानामिति।[redacted] द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वस्य व्यापकतावच्छेदकम्।गगनादौ द्रव्यकर्मणो
रभावात्।द्रव्यत्वत्वं सामान्यत्वादिकं वा न जातिरिति न धुदासः।निर्गुणा इति।यद्यपि निर्गुणत्वं कर्मादावपि त रामः ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रूपं रसः स्पर्शगंधौ परत्वमपरत्वकं ॥ द्रवो गुरुत्वं स्नेहश्च वेगो मूर्तगुणा अमी ॥ ७

थापि सामान्यवत्वे कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् । जात्यादिकं न सामान्यवत् । कर्मणो न कर्मान्यत्वं
द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः । निष्क्रिया इति स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः
मूर्तगुणा इति विगइत्यनेन स्थितिस्थापको ऽप्युपलक्षणीयः अमूर्ते तु न वर्तत इत्यर्थः ।
। एवमग्रेपि । धर्माधर्मौ भावना च शब्दो बुद्ध्यादयो पि च । एते ऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्ति
ताः संख्यादिर्विभागान्त उभयेषां गुणो मतः । उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः । लक्षणं तु मूर्तवृत्ति
वृत्त्यमूर्तवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्वं संख्यात्वादिकमादाय लक्षणसमन्वयः । संयोगश्च विभागश्च
संख्या द्वित्वादिकास्तथा द्विपृथक्त्वादयस्तद्वदेते ऽनेकाश्रिता गुणाः ॥ ८८ ॥ अनेकाश्रिता इति । संयोगविभाग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF





द्वित्वादीनि द्विवृत्तीनि। त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम्। अतःशेषगुणाः सर्वे मता एकैकवृत्त
यः इति रूपरसगंधस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्ने
हसंस्कारादृष्टशब्दा इत्यर्थः। बुद्ध्यादिषट्कंस्पर्शान्ताः स्नेहः सांसिद्धिकोद्रवः। अदृष्टभावनाशब्दा अमी वैशि
षिका गुणाः इति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः। स्पर्शान्ताः रूपरसगंधस्पर्शा इत्यर्थः। [illegible] वै
शेषिकाः। विशेषा एव वैशेषिकाः स्वार्थे ठक्। विशेषगुणा इत्यर्थः। संख्यादिरपरत्वान्तो द्रवो नैमित्तिकस्तथा गु
रुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः इति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः
॥ संख्यादिरपरत्वांतोऽद्रवत्वं स्नेह एव च एते तु द्वीन्द्रियग्राह्याः चक्षुषा त्वचापि ग्रहणयोग्यत्वात्। अथ स्पर्शा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नशब्दकाः। वाह्यैकैकेंद्रियग्राह्याः। रूपादीनांचक्षुरादिग्राह्यत्वात्। गुरुत्वादृष्टभावनाः। अतींद्रियाविभू
नानुयेस्युवैशेषिकागुणाः। अकारणगुणोत्पन्नाएतेतुपरिकीर्त्तिताः। बुद्धिसुखदुःखेछाद्वेषप्रयत्नध
र्माधर्मभावनाशब्दाइत्यर्थः। अकारणेति। कारणगुणपूर्वकाभवन्तीत्यर्थः। कारणगुणोनकार्य्यगुणाउ
त्पाद्यन्तइतितेकारणगुणपूर्वकाःरूपादयोवक्ष्यंतेबुद्ध्यादयस्तुनतादृशाः। आत्मादेःकारणाभावात्। अ
पाकजास्तुस्पर्शान्ताद्रवत्वंचतथाविधंस्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम्। स्थितिस्थापकइत्येतेस्युः
कारणगुणोद्भवाइति। पाकजरूपादीनांकारणगुणपूर्वकत्वाभावात्पाकजाइत्युक्तम्। तथाविधमपा
कजम्। तथैकत्वमपिबोध्यम्। संयोगश्चवेगश्चैतेतुकर्मजाइति। कर्मजत्वंयद्यपिनसाधर्म्यंघटादावति

विभागश्च १ संयोग १

मु॰ ८९ व्याप्तेः संयोगजसंयोगेऽव्याप्तेश्च तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम्। एवमन्यत्राप्यूह्यं
।स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके। भवेदसमवायित्वमिति। घटादिरूपरसगन्धस्पर्शाः कपाला
दिरूपरसगन्धस्पर्शेभ्यो भवन्ति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम
शब्दस्यापि द्वितीयशब्दं प्रति। एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम्। अथ वैशेषिके गुणे आत्मनः स्या
न्निमित्तत्वं। बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः। उष्णस्पर्शगुरुत्वयोः वेगेऽपि द्रवत्वे च संयोगादिद्व
ये तथा। द्विधैव कारणत्वं स्यात्। असमवायिकारणत्वं निमित्तकारणत्वं च तथा हि उष्णस्पर्शस्यासमवायिका
रणं पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतनयोरसमवायिकारणमभिघाते निमित्तं। वेगो वेगस्पंदयोरसमवायी राम: ८९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिघाते निमित्तम्। द्रवत्वं द्रवत्वस्यन्दयोरसमवायि। यस्संग्रहे निमित्तम्। भेरीदण्डसंयोगः शब्दे निमित्तं भे
र्य्याकाशसंयोगे असमवायी। वंशदलद्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागे असमवायीति।
अथ प्रादेशिको भवेत्। वैशेषिको विभुगुणः संयोगादिद्वयं तथा। प्रादेशिकः अव्याप्यवृत्तिः चक्षुर्ग्राह्यं भवे
द्रूपं द्रव्यादेरुपलंभकं। रूपत्व[illegible]जातिस्तु प्रत्यक्षसिद्धा रूपशब्दोल्लेखिना प्रतीतिर्नोत्पतीति चेन्मास्तु रूपश
ब्दप्रयोगः। तथापि नीलपीतादिष्वनुगतजातिविशेषेष्वनुभवसिद्ध एव। एवं नीलत्वादिकमपि प्रत्यक्ष
सिद्धं न चैवैका एव नीलारुणादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम्। नीलो
नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात्। अन्यथा एकनीलनाशे जगदनी

३ रूपशब्दप्रयोगेपि नीलो वर्णः पीतो वर्ण इति वर्णशब्देनैव प्रतीति
रस्त्येव ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सु° ७० त्वमापद्येत। न च नीलसमवायरक्तसमवाययोरेव विनाशोत्पादविषयकोऽसौ प्रत्यय इति वाच्यम्। प्रती-
त्या समवायानुल्लेखात्। न च स एवायं नील इति प्रत्ययाल्लाघवाच्चैक्यमिति वाच्यम्। प्रत्ययस्य तज्जातीयत्ववि-
षयत्वात्। सैवेयं गुर्जरीतिवत्। लाघवं प्रत्यक्षबाधितम्। अन्यथा घटादीनामप्यैक्यप्रसंगात्। उत्पादविना-
शबुद्धेः समवायावलंबनतापत्तिरिति। एतेन रसादिकं व्याख्यातम्। चक्षुर्ग्राह्यमिति। चक्षुर्ग्राह्यविशेषगु-
णा इत्यर्थः। एवमग्रेऽपि। द्रव्यादेरुपलम्भकमिति। उपलब्धिंकारणम्। इदमेव विवृणोति। चक्षुषः सहकारि
स्याच्छुक्लादिकमनेकधा। द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रत्युद्भूतरूपं कारणं तत्स्वरूपं शुक्लनी- राम: ७०
लसुपीतकर्बुरादिभेदादनेकप्रकारकं भवति। ननु कर्बुरं कथमतिरिक्तं रूपं भवति। इत्थं नीलपीताद्यारब्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त                    वि २                    ले २

ऽवयवी न तावन्नीरूपोऽप्रत्यक्षत्वप्रसंगात्। नापि व्याप्यवृत्तिनीलादिरूपमुत्पद्यते पीताद्यवच्छेदेनापि नी
लोपलब्धिप्रसंगात्। नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तिविरोधात्
तस्मान्नानाजातीयरूपैरवयविनि विजातीयं रूपं चित्रमारभ्यते अत एवैकं चित्रं रूपमित्यनुभवोपि नानारू
पकल्पने गौरवात्। ऽशे नीलादीनां पीताद्यारंभे प्रतिबंधकत्वकल्पनाद्वयविनि न पीताद्युत्पत्तिः एतेन
स्पर्शोपि व्याख्यातः। रसादिकमपि नाव्याप्यवृत्ति किंतु नानाजातीयरसवदवयवारब्धेऽवयविनि रसाभावे पि २
पि न क्षतिः। तत्र रसनया वयवरस एव गृह्यते रसनेंद्रियादीनां द्रव्यग्रहेऽसामर्थ्यात्। अवयविनि नीरसत्वेपि क्ष
तेरभावात्। न च व्याप्यवृत्तिव्याप्यवृत्तेस्तु नानारूपं नीलादेः पीतादौ प्रतिबंधकत्वकल्पने गौरवात् अत एव त्वो

१ प्रतिबंधकत्वकल्पनात् कथमेतदिति वाच्यम् एकावच्छेदेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु
७१ हितोयस्तुवर्णोनसुखेपुछ्छेचपाण्डुरःश्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते।इत्यादिशास्त्रमप्युपपद्यते।नच
आप्यामाप्यवृत्तिजातीयद्वयोर्विरोधःमानाभावात्।नचलाघवादेकंरूपंअत्रभवविरोधात्।अन्यथाघटादेरपि
लाघवादेकंस्यादिति।एतेनस्पर्शादिकमपिव्याख्यातमित्यपिवदन्ति।जलादिपरमाणौतन्नित्यमन्यसहेतुक
म्।जलपरमाणौतेजःपरमाणौचरूपंनित्यंपृथिवीपरमाणौरूपंतुननित्यंतत्रपाकेनरूपान्तरोत्पत्तेः।नहि
घटस्यपाकानन्तरंतदवयवाःपक्वाउपलभ्यन्तेनहिरक्तकपालस्यकपालिकानीलावयवाभवन्ति।एवंपरमा
णावपिपाकसिद्धेः।अन्यत्जलतेजःपरमाणुरूपभिन्नंरूपंसहेतुकंजन्यंरसंनिरूपयति।रसस्तुरसनाग्राह्यो राम:
मधुरादिरनेकधा।सहकारीरसज्ञायानित्यतादिचपूर्ववत्इतिसहकारीतिरासनप्रत्यक्षेरसःकारणमित्यर्थः ७१

वं१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्ववत् जलपरमाणौ रसो नित्यः अन्यः सर्वोप्यनित्य इत्यर्थः। गंधं निरूपयति। घ्राणेति। घ्राणग्राह्यो भवेद्गं
न्धो घ्राणस्यैवोपकारकः॥ सौरभं चासौरभं च स द्विधा परिकीर्तितम्। उपकारकः घ्राणजन्यप्रत्यक्षे कारणमि
त्यर्थः सर्वोपि गंधोऽनित्य एवं स्पर्शं निरूपयति। स्पर्श इति। स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः। अ
नुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः। काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत्। एतेषां पाकजत्वं च
क्षितौ नान्यत्र कुत्रचित्। तत्रापि परमाणौ स्यात्पाको वैशेषिके नये इति। उपकारकः। स्पार्शनप्रत्यक्षे स्पर्शः
कारणमित्यर्थः। अनुष्णाशीत इति पृथिवीवाय्वोः स्पर्शोऽनुष्णाशीतः तेजस उष्णः। कठिनसुकुमारस्पर्शः पृथि
व्यामेवेत्यर्थः। कठिनत्वादिकन्तु नसंयोगगतो जातिविशेषः॥ चक्षुर्ग्राह्यतापत्तेः। पूर्ववत्। जलतेजोवायुपर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
७२ माणूस्पर्शो नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगंधस्पर्शानाम्। पृथिव्यां हि रूपरसगंधस्पर्श
परावृत्तिरग्निसंयोगादुपलभ्यते। न हि शतधा ध्मायमाने जले रूपादिपरावर्तते। नीरे सौरभमौष्ण्यं वान्वय
व्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि मध्ये पर
माणावेव पाक इति वैशेषिका वदन्ति तेषामयमाशयः अवयविनाऽवष्टब्धेष्ववयवेषु पाको न संभवति। प
रं तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगात् द्व्यणुकादि
क्रमेण पुनर्महावयविपर्यंतमुत्पत्तिः। तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशे झटिति व्यूहान्तरोत्पत्ति राम:
श्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नस्य रूपादिमत्त्वमिति शिष्यबुद्धिवैशद्याय यत्र ७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियाः। तत्र विभागजविभागानंगीकारे न वक्ष्यमाणा। तदंगीकारे विभागः किंचित्सापेक्षो विभागं जनयेत् नि
रपेक्षस्य तत्त्वे कर्मत्वं स्यात्। तत्र संयोगविभागयोरनपेक्षं कारणं कर्मेति वैशेषिकसूत्रम्। स्वोत्तरभावानपे
क्षत्वं तस्यार्थः। अन्यथा कर्मणोऽप्युत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणाद्व्याप्तिंस्यादिति। तत्र यदि
द्रव्यारंभकसंयोगनाशविशिष्टकालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा। अथ द्रव्यनाशविशि
ष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदैकादशक्षणा। तथाहि आघानवक्षणावह्निसंयोगात्परमाणौ
कर्म ततः परमाण्वन्तरेण विभागस्ततः आरंभकसंयोगनाशः ततो द्व्यणुकनाशः ततः परमाणौ श्यामा
दिनाशः ततो रक्ताद्युत्पत्तिः ततो द्रव्यारंभानुगुणा क्रिया ततो विभागः ततः पूर्वसंयोगनाशः ततः आरंभक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ ७२ संयोगः। ततो द्व्यणुकोत्पत्तिः ततो रूपाद्युत्पत्तिः। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौऽद्व्या
रम्भानुगुणा क्रियास्त्विति चेन्न। अग्निसंयुक्ते परमाणौ यत्कर्म तद्धि नाशमन्तरेण गुणोत्पत्तिमन्तरेण वा त
त्र परमाणौ क्रियान्तराभावात्। कर्मवति कर्मान्तरानुत्पत्तेः निर्गुणोऽद्रव्येऽद्व्यारंभानुगुणा क्रियानुत्पत्तेश्च।
तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न पूर्वरूपादिध्वंसस्यापि रूपान्तरे हे
तुत्वात्। इति नवक्षणा। अथ दशक्षणा॥ सा चारंभकसंयोगनाशविशिष्टं कालमपेक्ष्य विभागेन विभाग
जनने सति स्यात्। तथा हि वह्निसंयोगात् द्व्यणुकारंभके परमाणौ कर्म ततो विभागः ततमारंभकसंयोग
नाशः ततो वह्नेर्नोदनजन्यपरमाणुकर्मणो नाशः ततोऽदृष्टवशादग्निसंयोगाद्व्यारम्भानुगुणा क्रिया ततो रामः ७२

विभागः। ततस्तत्पूर्वसंयोगनाशः। तत आरंभकसंयोगः। ततो द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिः। अथैषा दशक्ष
णा। वह्निसंयोगात्परमाणौ कर्म ततो द्रव्यविभागः। ततो द्व्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशस्ततो ७३
द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ ततः पूर्वसंयोगनाशो रक्तोत्पत्तिश्चेतरउत्त
रदेशसंयोगस्ततो वह्निनोदनजन्यपरमाणुकर्मनाशस्ततोऽदृष्टवशादग्निसंयोगाद्द्व्यारंभानुगुणा क्रिया।
ततो विभागस्ततः पूर्वसंयोगनाशस्ततो आरम्भकसंयोगस्ततो द्व्यणुकोत्पत्तिरथ रक्तोत्पत्तिः। मध्यमशब्द
वदेकस्याग्निसंयोगान्नरूपनाशरक्तोत्पत्तीति तावत्कालमेकस्याग्नेरस्थिरत्वात् किंच नाशकोयमुत्पादक
स्तदा नष्टरूपाद्यावग्निनाशे नीरूपश्चिरं परमाणुः स्यात्। उत्पादकश्चेन्नाशकस्तदा रक्तोत्पत्तौ तदग्निनाशे

७४ रक्तांतरतानस्पात। अथ परमाणवन्तरे कर्मचिन्तनात्यं च मादिस्सतो पि गुणोत्पत्तिः। तथा हि। कुत्रौ [श्रि१] परमाणौ क
र्म ततो विभागस्तत आरंभकसंयोगनाशः परमाणवन्तरकर्मणा ततो द्व्यणुकनाशः परमाणवन्तरकर्मजश्च
विभाग इत्येकः कालः ततः श्यामादिनाशः विभागाच्च पूर्वसंयोगनाश इत्येकः कालस्ततो रक्तोत्पत्ति द्रव्या
रम्भकसंयोग इत्येकः कालः अथ द्व्यणुकोत्पत्तिरथ रक्तोत्पत्तिरिति पंचक्षणा। द्रव्यनाशसमकालं परमा
णवन्तरे कर्म विंतनात षष्ठे गुणोत्पत्तिः तथा हि परमाणुकर्मणा परमाणवन्तरविभाग ततः आरंभकसं
योगनाशस्ततो द्व्यणुकनाशः परमाणवन्तरकर्मणा। अथ श्यामादिनाशः परमाणवन्तरे कर्मजविभागश्च एम:
ततो रक्तोत्पत्तिः परमाणवन्तरे पूर्वसंयोगनाशश्च ततः परमाणवन्तरसंयोगः ततो द्व्यणुकोत्पत्ति। अथ रक्तो ७४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्पत्तिः एवं श्यामनाशक्षणे परमाणावन्तरे कर्मविन्तनान्नवक्षणा। तथाहि। परमाणौ कर्म ततः परमाणव
न्तरे कर्मणा ततो रक्तोत्पत्तिपरमाणावन्तरे कर्मजविभागो ततः परमाणावन्तरे पूर्वसंयोगनाशस्ततः परमा
णावन्तरे संयोगस्ततो द्व्यणुकोत्पत्तिरथ रक्तोत्पत्तिरिति रक्तोत्पत्तिसमकालं परमाणावन्तरे कर्मविन्तनाद्दश
क्षणा इति। नैयायिकानां तु न ये द्व्यणुकादावपीष्यते इति। नैयायिकानां मते द्व्यणुकादावयविन्यपि
पाको भवति तेषामयमाशयः अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्व
पि पाको न विरुध्यते अनन्तावयवतन्नाशकल्पने गौरवं च इत्थं च सोऽयं घट इत्यादौ प्रत्यभिज्ञापि संगच्छ
ते यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियते संख्यां निरूपयति। गणनव्यवहारे तु हेतुः संख्या (

नैयायिक ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गगने　　　　　　　　　　　　　　　　　　　　नित्येष्वि

मु.
७५

भिधीयते।।ति।।गगनव्यवहारासाधारणंकारणंसंख्येत्यर्थः।नित्येषुनित्यमेकत्वमनित्येऽनित्यमिष्यते
।द्वित्वादयःपरार्द्धान्ताअपेक्षाबुद्धिजामताः।अनेकाश्रयपर्य्याप्ताएतेतुपरिकीर्तिताः।।नि।नित्येषुपरमा
ण्वादिषुएकत्वंनित्यंअनित्येघटादौएकत्वमनित्यमित्यर्थः।द्वित्वाद्योव्यासज्यवृत्तिसंख्याअपेक्षाबुद्धि
जन्याः।अनेकेति।यद्यपिद्वित्वादिसंबंधःप्रत्येकघटादावपिवर्त्ततेतथापिएकोद्वावितिप्रत्ययाभावात्।
एकोनद्वावितिप्रत्ययसद्भावाच्चद्वित्वादीनांपर्य्याप्तिलक्षणःकश्चित्संबंधोऽनेकाश्रयोऽभ्युपगम्यते।अपे घ३
क्षाबुद्धिनाशाच्चनाशस्तेषांनिरूपितः।।ति।प्रथममपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिस्ततोविशेषणज्ञानंद्वि राम:
त्वत्वनिर्विकल्पकंततोद्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्चततोद्वित्वनाशइति।यद्यपिज्ञानात् ७५

अपेक्षे२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रंद्विक्षणमात्रस्थायियोग्यविभुविशेषगुणानांस्वोत्तरवर्त्तिगुणनाश्यत्वात्।तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्था
यित्वंकल्प्यते।अन्यथाद्वित्वत्वनिर्विकल्पककालेऽपेक्षाबुद्धिनाशादनन्तरंद्वित्वस्यैवनाशःस्यात्।नतुद्वि
त्वप्रत्यक्षंतदानींविषयाभावात्।विद्यमानस्यैवचक्षुरादिनाज्ञानजननोपगमात्।तस्माद्द्वित्वप्रत्यक्षादि
कमपेक्षाबुद्धेर्नाशकंकल्प्यते।नचापेक्षाबुद्धिनाशात्कथंद्वित्वनाशइतिवाच्यम्।कालान्तरेद्वित्वप्रत्य
क्षाभावादपेक्षाबुद्धिस्तुत्यादिकातन्नाशस्तन्नाशकइतिकल्पनात्।अतएवतत्पुरुषीयापेक्षाबुद्धिजन्यद्वि
त्वादिकंतेनैवगृह्यतइतिकल्प्यते।नचापेक्षाबुद्धेर्द्वित्वप्रत्यक्षेकारणत्वमस्त्वितिवाच्यम्।लाघवेनद्वित्वप्र
त्यक्षेकारणत्वस्योचितत्वात्।अतीन्द्रियेद्व्यणुकादावपेक्षाबुद्धिर्योगिनांसर्गादिकालीनपरमाणवादावी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
७९

ष्वरीयापेक्षाबुद्धिर्द्वित्वगणानरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति।अपेक्षाबुद्धिःकेत्यतआ
ह।अनेकैकत्वबुद्धिर्य्यासापेक्षाबुद्धिरुच्यते।।परिमाणंभवेन्मानव्यवहारस्यकारणम्।।अनेकैकेति।अ
यमेकोऽयमेकइत्याकारिकेत्यर्थः।परिमाणंनिरूपयति।परिमाणमिति।परिमितिव्यवहारासाधारणं
कारणंपरिमाणमित्यर्थः।तच्चतुर्विधम्।अणुदीर्घमहद्ध्रस्वमितितद्भेदंदर्शयति।अणुर्महद्दीर्घंह्रस्वंचेति।।
तत्परिमाणमनित्यमितिनित्यमित्यत्रपरिमाणमित्यनुषज्यते।जायतेइत्यत्रापिपरिमाणमित्यनुवर्त
ते।अनित्येतदनित्यंस्यान्नित्येनित्यमितीष्यते।संख्यातःपरिमाणाच्चप्रचयादपिजायते।अनित्यमिति।पू
र्वैरणान्वितंतथाऽनित्यंपरिमाणंसंख्याजन्यंपरिमाणजन्यंप्रचयजन्यंचेत्यर्थः।तत्रसंख्याजन्यमुदाहरति

राम:
७९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनित्येद्व्यणुकादौतुसंख्याजन्यमुदाहृतम्।द्व्यणुकस्यत्रसरेणोश्चपरिमाणंप्रतिपरमाणुपरिमाणंद्व्य
णुकपरिमाणंवानकारणम्।परिमाणस्यस्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्।द्व्यणुकस्याणु
परिमाणन्तुपरमाणव[illegible]पेक्षयानोत्कृष्टंत्रसरेणुपरिमाणन्तुनसजातीयंअतःपरमाणौद्वित्वसंख्या
द्व्यणुकपरिमाणस्यद्व्यणुकेत्रित्वसंख्याचत्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः।परिमाण
जन्यमुदाहरति।परिमाणंघटादाविति।परिमाणंघटादौतुपरिमाणजमुच्यते।घटादिपरिमाणंकपा
लादिपरिमाणजन्यंप्रचयजन्यमुदाहर्तुंप्रचयंनिर्वक्ति।प्रचयःशिथिलाख्योयःसंयोगस्तेनजन्यते।प
रिमाणन्तूलकादौनाशस्त्वाश्रयनाशतः।प्रचयइति।नाशइति।अर्थात्परिमाणस्य।पृथक्त्वंनिरूपयति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।संख्यावत्तु पृथक्त्वं स्यात्पृथक्त्वप्रत्ययकारणम्।अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते॥११२॥संख्या
वदिति।पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वं नित्यतादिकं संख्यावत्।यथा हि।नित्येष्वेकत्वं नित्यम
नित्येषु नित्यम्।अनित्ये एकत्वमाश्रयद्वितीयक्षणे चोत्पद्यते।आश्रयनाशान्नश्यति तथैकपृथक्त्वम
पि।द्वित्वादिकवत् द्विपृथक्त्वादिकमपीत्यर्थः।नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते।तत्कथं
पृथक्त्वं गुणान्तरं स्वीक्रियते।न च पृथक्त्वमेवास्तु न त्वन्योन्याभाव इति वाच्यम्।रूपं न घट इति प्रतीत्यना
पत्तेः।न हि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति न ह्याघटे घटावधिकं पृथक्त्वमस्ति येन परंपरासंबंधः
कल्प्यते इत्यत आह।अन्योन्याभावतो नास्येति।अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा।अप्राप्तयोस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याप्राप्तिःसैवसंयोगईरितः॥ ११२॥विलक्षणेति।ननुशब्दवैलक्षण्यमेवनत्वर्थवैलक्षण्यमितिचेन्न।
विनार्थभेदंघटात्पृथगितिवत्घटोनेत्यत्रापिपंचमीप्रसंगात्।तस्माद्यदर्थकयोगेपंचमीसोऽर्थोन
न्योन्याभावतोभिन्नोगुणान्तरंकल्प्यतइति।संयोगंनिरूपयति।अप्राप्तयोरिति।तंविभजते।कीर्तित
स्त्रिविधस्तत्रेषआद्योन्यतरकर्मजः।तथोभयस्पंदजन्योभवेत्संयोगतोपरः॥ ११४॥एषः संयोगः।आदिमः
श्येनशैलादिसंयोगःपरिकीर्तितः।मेषयोःसन्निपातोयःसद्वितीयउदाहृतः॥कपालतरुसंयोगात्सं
योगस्तरुकुम्भयोः॥ ११५॥तृतीयःस्यात्कर्मजोपिद्विधैवपरिकीर्तितः।अभिघातोनोदनंचशब्दहेतुरि
हादिमः।शब्दाहेतुर्द्वितीयःस्यात्।सन्निपातःसंयोगःद्वितीयउभयकर्मजः।तृतीयइतिसंयोगजःसंयोग

मु. ७८ इत्यर्थः। तृतीयः स्यादिति पूर्वेणान्वितम्। आदिमोऽभिघातः। द्वितीयो नोदनाख्यसंयोगः। विभक्तप्रत्यया
साधारणं विभागं निरूपयति विभागोऽपि त्रिधा भवेत्। एककर्मोद्भवस्त्वाद्यः कर्मद्वयभवोऽपरः॥ ११७॥
विभाग इति। विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा मतः। हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः। एक
कर्मेति। उदाहरणन्तु श्येनशैलविभागादिकं पूर्ववद्बोध्यम्। तृतीयो विभागजः कारणमात्रविभागज
न्यः कारणाकारणविभागजन्यश्चेति। आद्यस्तावद्घटकपाले कर्म ततः कपालद्वयविभागस्ततो घटारं
भकसंयोगनाशस्ततो घटनाशस्ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याका[illegible] विभागो एमः
जन्यते। तत आकाशसंयोगनाशः। तत उत्तरदेशसंयोगस्ततः कर्मनाश इति। न च तेन कर्मणैव कथं देशान्त ७८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रविभागोनजन्यतइतिवाच्यम्।एकस्यकर्मणआरंभकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारंभ
कसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यचविरोधात्।अन्यथाविकसत्कमलकुड्मलभंगप्रसंगात्।त
स्माद्यदाद्रमनारम्भकसंयोगप्रतिद्वंद्विविभागंजनयेत्तदारम्भकसंयोगप्रतिद्वंद्विविभागन्नजनये
त्।नचकारणविभागेनैवद्रव्यनाशात्पूर्वंकुतोदेशान्तरविभागोनजन्यतइतिवाच्यम्।आरंभक
संयोगप्रतिद्वंद्विविभागवतोऽवयवस्यसतिद्रव्येदेशांतरविभागासम्भवात्।द्वितीयस्तावत्।यत्रह
स्तक्रिययाहस्ततरुविभागस्ततःशरीरेऽपिविभक्तप्रत्ययोभवति।तत्रचशरीरतरुविभागेहस्तक्रिया
नकारणंव्यधिकरणत्वात्।शरीरेतुक्रियानास्त्येव।अवयविकर्मणोयावदवयवकर्मनियतत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
७९

भनस्तत्रकारणाकारणविभागेनकार्य्याकार्य्यविभागोजन्यतइतिअतएवविभागोगुणान्तरम्।अन्यथा
शरीरेविभक्तप्रत्ययोनस्यात्।अतःसंयोगनाशेनविभागोनान्यथासिद्धोभवति।परापरव्यवहारनिमि
त्तेपरत्वापरत्वेनिरूपयति।परत्वंचापरत्वंचद्विविधंपरिकीर्तितम्।दैशिकंकालिकंचापिमूर्तएवतुदै
शिकम्।दैशिकमिति।दैशिकंपरत्वंबहुतरसूर्य्यसंयोगान्तरितत्वज्ञानादुत्पद्यते।एवंतदल्पीयस्त्वज्ञा
नादपरत्वमुत्पद्यते।भिन्नावधित्वार्थंपंचम्यपेक्षा।यथापाटलिपुत्रात्काशीमपेक्ष्यप्रयागःपरःपाट
लिपुत्रात्कुरुक्षेत्रमपेक्ष्यप्रयागोऽपरइति।तयोर्दैशिकपरत्वापरत्वयोरसमवायीअसमवायिकार राम:
णम्।तदाश्रयेदैशिकपरत्वापरत्वाश्रये।परत्वंसूर्य्यसंयोगभूयस्त्वज्ञानतोभवेत्॥१२०॥अपरत्वंतद ७९

परत्वंचेति ५

ल्पत्वबुद्धितःस्यादितीरितम्।तयोरसमवायीतुदिक्संयोगस्तदाश्रये॥१२१॥दिवाकरपरिस्पन्दभूयस्त्वज्ञा
नतोभवेत्।परत्वमपरत्वंतुतदीयाल्पत्वबुद्धितः॥अत्रत्वसमवायीस्यात्संयोगःकालपिण्डयोः॥१२२॥
दिवाकरेति।अत्रपरत्वमपरत्वंचकालिकंग्राह्यम्।यत्सूर्य्यपरिस्पंदापेक्षयायस्यसूर्य्यपरिस्पंदोधिकः
सज्येष्ठः।यस्यन्यूनःसकनिष्ठः।कालिकपरत्वापरत्वेजन्यद्रव्यएव।अत्रकालिकपरत्वापरत्वयोः।अपेक्षा
बुद्धिनाशाच्चनाशस्तेषांनिरूपितः।तेषांकालिकदैशिकपरत्वापरत्वानाम्।निरूपणात्क्रमप्राप्तांबुद्धिं
निरूपयति।बुद्धेःप्रपंचःप्रागेवप्रायशोविनिरूपितः।अथावशिष्टोप्यपरःप्रकारःपरिदृश्यते।अप्रमा
चप्रमाचेतिज्ञानंद्विविधमिष्यते।अप्रमान्निरूपयति।तच्छून्येतन्मतिर्यास्यादप्रमासानिरूपिता।तद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु॰ भाववतितत्प्रकारकंज्ञानंभ्रमइतितत्प्रपंचोविपर्यासःसंशयोपिप्रकीर्तितः।तत्प्रपंचःअप्रमाप्रपंचः।
८० आद्योदेहेष्वात्मबुद्धिःशंखादौपीततामतिः।भवेन्निश्चयरूपासासंशयोथप्रदर्श्यतइति।आद्यःविपर्य्या
सइत्यर्थःशरीरादौनिश्चयरूपंयदात्मप्रकारकंज्ञानंगौरोहमित्याकारकंएवंशंखादौपीतःशंखइत्याकारकं
यज्ञानंनिश्चयरूपंतद्भ्रमइति।किंस्विदिति।किंस्विन्नरोवास्थाणुर्वेत्यादिबुद्धिस्तुसंशयः।किंस्विदितिवित
र्कैनिश्चयलक्षणमाह।तदभावाप्रकाराधीस्तत्प्रकारातुनिश्चयः।तदभावाप्रकारकंतत्प्रकारकंज्ञानंनिश्चयः
संशयंलक्षयति।ससंशयोमतिर्य्यास्यादेकत्राभावभावयोः।एकधर्मिकविरुद्धभावाभावप्रकारकंसंशयइ एनः
त्यर्थः।साधारणादिधर्मस्यज्ञानंसंशयकारणम्।उभयसाधारणोयोधर्मस्तज्ज्ञानंसंशयकारणम्।यथोच्चैस्त्वं ८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थाणवस्थाणुसाधारणं ज्ञात्वा स्थाणुर्न वेति संदिग्धे। एवमसाधारणधर्मज्ञानं कारणं यथा शब्दत्वं नित्या
नित्यव्यावृत्तं शब्दे गृहीत्वा नित्यो न वेति संदिग्धे विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयका
रणं शब्दव्याप्तिज्ञानात्। नं निश्चयमात्रजनकत्वस्वाभाव्यात्। किंतु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयः
स्तु मानस एवेति। एवं ज्ञानेऽप्रामाण्यसंशयाद्विषयसंशयः। एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं
बोध्यम्। किन्तु न संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति। दोषोऽप्रमाया जनकः प्रमायास्तु
गुणो भवेत्। अप्रमां प्रति दोषः कारणम्। प्रमां प्रति गुणाः कारणम्। तत्रेऽपि। । दोषा अननुगतास्तेषां कारण
त्वमन्वयव्यतिरेकादेव सिद्धं गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम्। यथा प्रमा ज्ञानसामान्यकारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु.
८१

भिन्नकारणाजन्या।जन्यज्ञानत्वादप्रमावत्।नचदोषाभावःकारणमस्तितिवाच्यम्।पीतःशंखइतिज्ञानस्थ
लेपित्तरूपदोषसत्वाच्छंखेप्रमानुत्पत्तिप्रसंगात्।विनिगमनाविरहादनन्तदोषाभावकारणत्वमेपक्ष्यगुण
कारणतायाःसाध्यत्वाच्चनचगुणसत्वेपिपित्तेनप्रतिबंधाच्छंखेनश्वैज्ञानमतःपित्तादिदोषाभावानांकार
णत्वमवश्यंवाच्यम्।तथाचकिंगुणस्यहेतुत्वकल्पनेनेतिवाच्यम्।तथाप्यन्वयव्यतिरेकाभ्यांगुणस्यापिहेतु
त्वसिद्धेः।एवंभ्रमंप्रतिगुणाभावःकारणमित्यस्यापिसुवचत्वात्।ननुदोषाःकेइत्यपेक्षायामाह।पित्तदूर
त्वादिरूपोदोषोनानाविधोमतः।कश्चित्पीताद्भ्रमेपित्तंदोषः।कचितवंशादेःस्वल्पपरिमाणभ्रमेदूरत्वंदोषः। यत्नः ८१
कचिच्चवंशोरगभ्रमेमण्डूकवसांजनमित्येवंदोषाः।अननुगताएवभ्रांतिजनकाइत्यर्थः।अथकेगुणाइत्या

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कांक्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति। प्रत्यक्षे तु विशेष्येण विशेषणवता समम् संनिकर्षो गुणस्तु
स्यादथ त्वनुमितौ पुनः। प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। पक्षे साध्यविशिष्टे तु परामर्शो गुणो
भवेत्। अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः। एवमग्रेऽप्यूह्यम्। शक्ये सादृश्यबुद्धिस्तु भवेदु
पमितौ गुणः। शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा गुणः स्यात्। प्रमां निरूपयति। भ्रमभिन्नं तु ज्ञा
नमत्रोच्यते प्रमा। ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि न प्रमा स्यात् ज्ञान
स्य भ्रमभिन्नत्वाभावादत आह। अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्। तद्वद्विशेष्यकं तत्प्रकारकं
ज्ञानं प्रमेत्यर्थः। इदमनुबोध्यम्। येन संबंधेन तद्वत्ता तेन संबंधेन तद्वद्विशेष्यकज्ञानेन संबंधेन तत्प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ ८२ रकत्वं वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः। एवं सति निर्विकल्पकं न प्रमा स्यात्। तस्य
सप्रकारकत्वाभावादत आह। तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकमप्रकारतादिशून्यं हि संबंधानव
गाहि तत्। न च वृक्षे कपिसंयोगज्ञानं प्रमा भ्रमश्च स्यादिति चेन्न। प्रतियोगिव्यधिकरणसंयोगाभाववति।
संयोगज्ञानस्य भ्रमत्वात्। न च वृक्षे संयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यात्। तत्र संयोगाभावस्य
प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्। तत्र संयोगानवच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्
त्वस्य स्याननुगमाल्लक्षणाननुगमेपि न क्षतिः। प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः। मीमांसका हि प्रमा रामः
त्वं स्वतो ग्राह्यमिति वदंति। तत्र गुरूणां मते ज्ञानस्य स्वतःप्रकाशरूपत्वात् ज्ञानप्रामाण्यं तेनैव गृह्यत इति। ८२

क्ष२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भट्टानां मते तु ज्ञानमतीन्द्रियं ज्ञानजन्या ज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मते
तु अनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषां मते पि तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। वि
षयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः। तन्मतं दूषयति प्रमात्वं न स्वतो ग्राह्यं संशयानुपप
त्तितः। व्यभिचाराग्रहोयत्र सहचारग्रहस्तथा। हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः। संशयेति।
यदि ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्यात्तदाऽनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात्। तत्र हि यदि
ज्ञानं ज्ञातं तदा तन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न ज्ञातं तर्हि धर्मिज्ञानाभावात्
कथं संशयः। तस्माज्ज्ञाने प्रामाण्यमनुमेयम्। तथाहि। इदं ज्ञानं प्रमा संवादि प्रमा॰वृत्तिजनकत्वात्

प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. ८२ णं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गंधवति पृथिवीत्वप्रकारकज्ञानत्वात् । एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा
स्नेहवति जलत्वप्रकारकज्ञानत्वात् । नच हेतुज्ञानं कथं जातमिति वाच्यम् । पृथिवीत्वप्रकारकत्वस्य स्वतो ग्रा
ह्यत्वात् । तत्र गंधग्रहेण गंधवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारावच्छिन्नतद्विशेष्यकत्वं परतो गृह्यते
संशयानुरोधात् । ननु सर्वेषामेव ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम् । नच
रंगे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्तव मते भ्रमस्याभावादिति वाच्यम् । तत्र दोषाधीनस्य पुरोवर्तिनि
स्वतंत्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम् । अस्तु राम: ८२
वा तत्रापि भेदाग्रह एव कारणमिति । नचान्यथाख्यातिः संभवति । रजतप्रत्यक्षकारणस्य रजतसन्निक

मु२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षेस्याभावाद्रंगे रजतत्वारोपानुपपत्तेरिति चेन्न । सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृ
प्तत्वात् । अन्यत्रापि तत्कल्पनात् । न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ तु भेदाग्रहः कारणमि
ति वाच्यम् । लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थं च रंगे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञा
नलक्षणाप्रत्यासत्तिकल्पनेपि न क्षतिः । फलमुखगौरवस्यादोषत्वात् । किं च रंगरजतयोरिमे रजते
इति यत्र ज्ञानं तत्र नकारणाबाधोपि । अपि च यत्र रंगरजतयोरिमे रजतरंगे इति ज्ञानं तत्रोभयत्र युग
पत्प्रवृत्तिनिवृत्ती स्याताम् । रंगे रंगभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात् । त्वन्मते रंगे रंग
भेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वात् । दोषादेव रंगे रजतभेदाग्रहस्य रजते रंगभेदाग्रहस्य च स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यभिचारस्याग्रहोऽपि सहचाराग्रहस्तथा।५

मु॰ त्वात्। किंच अनुमितिप्रतिभेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवत्त्वेदाग्रहादनुमितिर्निराबाधा
८४ यद्विवविशिष्टज्ञानं कारणं तदायोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितम्। सेयमनु
भयतःपाशारज्जुः। इयं वान्यथाख्यातौ प्रत्यक्षमेव प्रमाणां रंगं रजततया जानामीत्यनुभवादिति संक्षेपः
पूर्वं व्याप्तिग्रहकारणत्वोपायस्तु न दर्शितः इत्यत स्तं दर्शयति। व्यभिचारस्येति। व्यभिचाराग्रहः सहचारग्रह
श्च व्याप्तिग्रहे कारणमित्यर्थः। व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबंधकत्वात् तदभावः कारणं एवमन्वयव्य
तिरेकाभ्यां सहचारज्ञानस्यापि हेतुता। भूयोदर्शनं तु न कारणम्। व्यभिचारास्फूर्तौ सकृद्दर्शनेपि क्वचित् एम॰
व्याप्तिग्रहात्। क्वचिद्व्यभिचारशंकाविधूननद्वारा भूयोदर्शनमुपयुज्यते। यत्तु भूयोदर्शनादपि शंकानापै ८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नितत्र विपक्षे वाधकस्तर्कोपेक्षितः। तथाहि। वह्निविरहिणोपि धूमः स्यादिति यद्याशंका भवति तदासाव
ह्निधूमयोः कार्य्यकारणभावस्य प्रतिसंधानान्निवर्त्तते। यद्ययं वह्निमान्न स्यान्नदा धूमवान्न स्यात्। कारणं
विना कार्य्यो नुत्पत्तेः। यदि च कश्चित्कारणं विना भविष्यत्यहेतुक एव भविष्यतीति तत्राप्याशंका भवति त
दासाव्याघातादपसारणीया। यदि कारणं विना कार्य्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य अर्थ इति पन्न
र्थेशवस्य नियमत उपादानन्नवैव न स्यादिति। यत्र स्वत एव शंका नावतरति। तत्र न तर्कापेक्षापीति तदि
दमुक्तं। तर्कः क्वचिच्छंकानिवर्त्तक इति। इदानीमुपाधिन्निरूपयति। साध्यस्य व्यापकोयस्तु हेतोरव्यापकस्त
थाऽस उपाधिर्भवेत्तस्य निष्कर्षोयं प्रदर्श्यते। साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. त्यर्थः।ननुसश्यामोमित्रातनयत्वादित्यत्रशाकपाकजत्वंनोपाधिःस्यात्तस्यसाध्यव्यापकत्वाभावात्।श्याम
८५ त्वस्यकोकिलादावपिसत्त्वात्।एवंवायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वंनोपाधिःस्यात्।प्र
त्यक्षत्वस्यात्मादावपिसत्त्वात्।तत्रचउद्भूतरूपाभावात्।एवंध्वंसोविनाशीजन्यत्वादित्यत्रभाववत्त्वंनोपाधिः
स्यात्।विनाशित्वस्यप्रागभावेपिसत्त्वात्।तत्रचभाववत्त्वाभावादितिचेन्न।यद्धर्मावच्छिन्नसाध्यव्यापक
त्वंतद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थेतात्पर्यात्।मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकंशा
कपाकजत्वंएवंबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्यव्यापकमुद्भूतरूपवत्त्वंबहिर्द्रव्यत्वावच्छिन्नसाधनस्या राम:
व्यापकंचएवंध्वंसोविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्नसाध्यव्यापकंभाववत्त्वंउपाधिं।एवंसङ्केतोनुए ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताद्दशोधर्मोनास्तियदवच्छिन्नस्यसाध्यस्यव्यापकंतदवच्छिन्नस्यसाधनस्यचाव्यापकंकिंचित्स्यात्।व्य
भिचारिणिनूपाध्यधिकरणंयत्साध्याधिकरणंयच्चोपाधिशून्यंसाध्यव्यभिचारनिरूपकमधिकरणं।
अंततस्तदन्यतरत्वावच्छिन्नस्यसाध्यस्यव्यापकत्वंतदवच्छिन्नसाधनस्याव्यापकत्वमुपाधेःसंभवती
ति।अतएवलक्ष्यमपिउपाधिस्वरूपमेतदनुसारेणदर्शयति।सर्वेसाध्यसमानाधिकरणाःस्युउपाधयः
हेतोरेकाश्रयेयेषांस्वसाध्यव्यभिचारितास्वसाध्यइति।स्वमुपाधिःस्वंचसाध्यंचस्वसाध्येतयोर्व्यभिचारिते
त्यर्थः॥उपाधेर्दूषकताबीजमाह।व्यभिचारस्यानुमानमुपाधेस्तुप्रयोजनम्।उपाधिव्यभिचारेणसाध्य
व्यभिचारानुमानमुपाधेःप्रयोजनमित्यर्थः।तथाहि।यत्रशुद्धसाध्यव्यापकउपाधिस्तत्रशुद्धेनैवोपाधि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गु.
८९ 
व्यभिचारेणसाध्यव्यभिचारानुमानम्।यथाधूमवान्वह्नेरित्यादौवह्निर्धूमव्यभिचारीआर्द्रेंधनव्यभिचारि
त्वादितिव्यापकव्यभिचारेणव्याप्यव्यभिचारावश्यकत्वात्।यत्रकिंचिद्धर्मावच्छिन्नसाध्यस्यव्यापकउ
पाधिस्तत्रतद्धर्मवतिउपाधिव्यभिचारेणसाध्यव्यभिचारानुमानम्।यथासश्यामोमित्रातनयत्वादित्या
दौमित्रातनयत्वंश्यामत्वव्यभिचारिमित्रातनयेशाकपाकजत्वव्यभिचारित्वादिति॥बाधानुन्नीतपक्षे
तरस्तुनोपाधिस्तत्रसाध्यव्यापकताग्राहकप्रमाणाभावात्।स्वव्याघातकत्वाद्बाधोन्नीतपक्षेतरस्तुउपा
धिर्भवत्येव।यथावह्निरनुष्णःकृतकत्वादित्यादौप्रत्यक्षेणवह्नेरुष्णत्वग्रहेवह्न्यन्तरत्वमुपाधिर्यस्यतूपाधेः राम:
साध्यव्यापकत्वादिकंसंदिह्यतेससंदिग्धोपाधिःपक्षेतरस्तुसंदिग्धोपाधिरपिनोद्भावनीयः।कथकसंप्रदा ८९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानुरोधादिति केचित्। सत्प्रतिपक्षोत्थापनमुपाधेः फलं तथाहि। अयोगोलकं धूमवद्वह्नेरित्यादावयोगो
लकं धूमाभाववत्। आर्द्रेन्धनाभावादिति सत्प्रतिपक्षसंभवादिति। इयं च साधनव्यापकोपि कश्चिदुपा
धिः। यथा करकापृथिवी कठिनावयवसंयोगवत्वादित्यादौ अनुष्णाशीतस्पर्शवत्वं उपाधिः। न चात्र स्वरू
पासिद्धिरेव दूषणमिति वाच्यम्। सर्वत्रोपाधेर्दूषणान्तरसांकर्यात्। अत्र च साध्यव्यापकपक्षावृत्तिरुपाधि
रित्याहुः। शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते। अनुमानगतार्थत्वादिति वैशेषिकं मतम्। वैशेषिका
नां मते प्रत्यक्षमनुमानं च प्रमाणं। शब्दोपमानयोरनुमानविधयैव प्रामाण्यम्। तथाहि। दण्डेन गाम
भ्याजेति पदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकानि। आकांक्षादिमत्व.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु॰ ८७ दकदंवकत्वात्घटमानयेतिपदकदंववत्।यद्वाएतेपदार्थामिथःसंसर्गवन्तःयोग्यतादिमत्पदोपस्था
पितत्वात्तादृशपदार्थवत्।दृष्टान्तेपिदृष्टान्तान्तरेणसाध्यसिद्धिः।एवंगवयप्रत्यक्षानन्तरंगवयपदंगव
यत्वप्रवृत्तिनिमित्तकम्।असतिवृत्यन्तरेवृद्धैस्तत्रप्रयुज्यमानत्वात्।असतिवृत्यंतरेयत्रवृद्धैःप्रयुज्यते
तत्तत्प्रवृत्तिनिमित्तकमितियथागोपदंगोत्वप्रवृत्तिनिमित्तकंयद्वागवयपदंसप्रवृत्तिनिमित्तकंसा
धुपदत्वादित्यनुमानेनपक्षधर्मताबलात्गवयत्वप्रवृत्तिनिमित्तकत्वंभासतेइतितन्मतंदूषयति।
तन्नसम्यग्विनाव्याप्तिर्वोधंशाब्दादिबोधतः।व्याप्तिज्ञानंविनापिशाब्दबोधस्यानुभाविकत्वात्।नहिस रामः
र्वज्ञशब्दश्रवणानन्तरंव्याप्तिज्ञानेमानमस्तीति।किंच।सर्वज्ञशाब्दस्थलेयदिव्याप्तिज्ञानंकल्प्यतेतदा ८७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वत्रानुमितिस्थलेपदज्ञानंकल्पयित्वाशाब्दबोधएवकिंनस्वीक्रियतेइति।त्रैविध्यमनुमानस्यकेवला
न्वयिभेदतः।द्वैविध्यंतुभवेद्व्याप्तेरन्वयव्यतिरेकतः॥अन्वयव्याप्तिरुक्तैवव्यतिरेकादथोच्यते।अनुमा
नंहित्रिविधम्।केवलान्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकिभेदात्।तत्रासद्विपक्षःकेवलान्वयिय
थाइदमभिधेयंप्रमेयत्वादित्यादौतत्रहिसर्वस्यैवाभिधेयत्वाद्विपक्षासत्त्वम्।असत्सपक्षःकेवलव्यति
रेकी।यथापृथिवीतरेभ्योभिद्यतेगन्धवत्त्वादित्यादौतत्रहिजलादित्रयोदशभेदस्यपूर्वमसिद्धतया
निश्चितसाध्यवतःसपक्षस्याभावइति।सत्सपक्षविपक्षोन्वयव्यतिरेकी।यथावह्निमान्धूमादित्या
दौ।तत्रसपक्षस्यमहानसादेर्विपक्षस्यजलह्रदादेश्चसत्त्वादितितत्रहिव्यतिरेकिणोव्यतिरेकव्याप्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुः ८८ ज्ञानं कारणमिति तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति। साध्याभावव्यापकत्वं हेत्वभावस्य यत्त्वेन। साध्याभावव्यापकी
भूताभावप्रतियोगित्वमित्यर्थः। अत्रेदं बोध्यम्। येन संबंधेन यत्र येन रूपेण व्यापकता गृह्यते तत्संबंधाव
च्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ताज्ञानात्। यत्संबंधेन यदवच्छिन्नं प्रति व्याप्यता गृह्यते त
त्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य तत्र सिद्धिः। इत्थं च पत्रेतरत्वव्यापकत्वं गंधाभावे
गृह्यते तत्र गंधाभावाभावेन इतरत्वात्यंताभावः सिध्यति। यत्र तु तादात्म्यसंबंधेनेतरव्यापकता गृह्यते
तत्र तादात्म्यसंबंधेन इतरस्याभावः सिध्यति स एव चान्योन्याभावः। एवं यत्र संयोगसंबंधेन धूमं प्रति रामः
संयोगसंबंधेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे सं ८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगसंबंधावछिन्नप्रतियोगिताकधूमाभावः सिध्यति अत्रच व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञा
नंकारणम्। केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेवगृह्यते नतु व्यतिरेकव्याप्तिज्ञानंकारणम्। यत्र
व्यतिरेकसहचारग्रहाप्तिग्रहस्तत्रव्यतिरेकीत्युच्यते। साध्यप्रसिद्धिस्तु घटादावेव जातापश्चात्पृथिवीत्वा
वछेदेनसाध्यतेइतिवदंति। अर्थापत्तेस्तु नैवेहप्रमाणान्तरतेष्यते। व्यतिरेकव्याप्तिवुभ्भा व्यरितार्थाहि
सायतः। अर्थापत्तिःप्रमाणांतरमितिकेचनमन्यंते। तथाहि। यत्र देवदत्तस्य शतवर्षजीवित्वंज्योतिः
शास्त्रादवगतंजीविनोगृहासत्त्वंचप्रत्यक्षादवगतन्तत्रशतवर्षजीवित्वान्यथानुपपत्त्यावहिःसत्त्वंक
ल्प्यतेनतदप्यनुमानेनगतार्थत्वान्नेष्यते। तथाहिजीवित्वस्यवहिःसत्वगृहसत्वान्यतरनूव्याप्यत्वंगृही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. ८८ तन्नत्रान्यतरसिद्धौज्ञायमानायांगृहसत्त्वबाधाद्बहिःसत्त्वमनुमितौभासते।एवंपीनोदेवदत्तोदिवानभुं
क्तेइत्यादौपीनत्वस्यभोजनव्याप्यत्वावगमाद्भोजनसिद्धेर्दिवाभोजनबाधेरात्रिभोजनंसिध्यतीति।अ
भावप्रत्यक्षस्यानुभाविकत्वादनुपलंभोपिनप्रमाणान्तरम्।किंचानुपलम्भस्याज्ञानस्यहेतुत्वेज्ञाना
करणत्वात्प्रत्यक्षत्वम्।ज्ञानस्यहेतुत्वेतुन त्राप्यनुपलम्भांतरापेक्षेत्यनवस्थाचेष्टापिनप्रमाणान्तरंत
स्याःशब्दस्मारकत्वेनलिप्यादिसमशीलत्वाच्छब्दएवान्त र्भावात्।यदितुव्याप्त्यादिग्रहस्तत्रानुमितिरे
वेति।सुखन्निरूपयतिसुखन्तुजगतामेवकाम्यंधर्मजंजायते।काम्यमभिलाषविषयःधर्मेणेति
धर्मत्वेनसुखत्वेनकार्य्यकारणभावइत्यर्थः।प्रकूलमिति।सर्वेषांस्वाभाविकद्वेषविषयमित्यर्थः।इ राम: ८८

ति १ अधर्मजन्यंदुःखंस्यात्प्रतिकूलंसचेतसाम्॥

निरूपयति। निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते। इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि। इच्छा फल
विषयिणी। उपायविषयिणी च। फलं सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव
वस्तुतः पुरुषार्थः सम्भवति। यज्ज्ञातं सत्स्ववृत्तितयेष्यते। इतरेच्छानधीनेच्छाविषयत्वं फलितार्थः। उ
पायेच्छां प्रति इष्टसाधनताज्ञानं कारणम्। चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत्। कृतिसाध्यत्व दि ४
प्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभवात्। तद्धेतुः कृ
तिसाध्येष्टसाधनत्वमतिर्भवेत्। चिकीर्षां प्रति कृतिसाध्यताज्ञानं इष्टसाधनताज्ञानं च कारणम्। अत एव
वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा। वलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका। वलवद्द्विष्ट

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
९०

साधनताज्ञानंतत्रप्रतिबन्धकमतोमधुविषसंपृक्तान्नभोजनेनचिकीर्षाबलवद्द्वेषःप्रतिबन्धकइत्यन्ये।त
दहेतुत्वबुद्धेस्तुहेतुत्वंकस्यचिन्मते।बलवदनिष्टजनकत्वज्ञानंकारणमित्यर्थः।कृतिसाध्यताज्ञानादिम
तोबलवदनिष्टसाधनताज्ञानमप्यन्यस्यबलवदनिष्टाजनकत्वज्ञानंविनापिचिकीर्षायांविलंबत्वाभावा
त्।कस्यचिन्मतेइतिअस्वरसोदर्शितः।द्वेषंनिरूपयति।द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्यकारणम्।दुःखो
पायविषयकद्वेषंप्रतिद्विष्टसाधनज्ञानंकारणमित्यर्थः।बलवद्द्विष्टसाधनताज्ञानंचप्रतिबन्धकम्।तेन
नांतरीयकदुःखजनकेपाकादौनद्वेषः।प्रयत्नंनिरूपयति।प्रवृत्तिश्चनिवृत्तिश्चतथाजीवनकारणम्।।
एवंप्रयत्नत्रैविध्यंतांत्रिकैःपरिकीर्तितम्।।प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात्।प्रयत्नत्रिविधइत्यर्थः।

राम:
९०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा॥ मधुविषसंपृक्तान्नभोजनादौ वलवदनिष्टानुवंधित्वेन चिकी
र्षाभावान्नप्रवृत्तिरितिभावः। कृतिसाध्यताज्ञानादिव वलवदनिष्टाननुवंधित्वज्ञानमपि स्वतंत्रान्वय
व्यतिरेकात्प्रवृत्तौ कारणमित्यपि वदंति। कार्य्यताज्ञानमेव प्रवर्तकमिति गुरवः तथाहि। ज्ञानस्य प्रवृ
त्तौ जनकतायां चिकीर्षातिरिक्तत्वापेक्षितमस्ति सा च कृतिसाध्यताज्ञानसाध्या। इच्छायाः स्वप्रकार
प्रकारकधीसाध्यत्वनियमात्। चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा। तत्र कृतिसाध्यत्वं प्रकारस्तत्
प्रकारकं ज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः। न त्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येपि प्रवृत्त्या
पत्तेः। कृत्यसाध्यताज्ञानं प्रतिवंधकमिति चेन्न। तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। न च

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
२१

द्वयोरपिहेतुत्वम्।गौरवात्।नतुत्वन्मतेपिमधुविषसंपृक्तान्नभक्षणेचैत्यवंदनेचप्रवृत्त्यापत्तिःकार्य्यता
ज्ञानसत्वादितिचेन्नस्वविशेषणवत्ताप्रतिसंधानजन्यकार्य्यताज्ञानस्यप्रवर्त्तकत्वात्।काम्येहियागपाका
दौकामनास्वविशेषणम्।ततश्चबलवदनिष्टाननुबंधिकाम्यस्यसाधनताज्ञानेनतत्कार्य्यताज्ञानम्।ततः
प्रवृत्तिः।तृप्तस्यभोजनेनप्रवर्त्तते।तदानींकामनायाःपुरुषविशेषणत्वाभावात्।नित्येचशौचादिकंपुरुष
विशेषणम्।तेनशौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्रप्रवृत्तिः।नतुतदपेक्षयालाघवेनबलवद
निष्टाननुबंधीष्टसाधनताविषयककार्य्यताज्ञानमेवहेतुरस्तु।बलवदनिष्टाननुबंधित्वंचइष्टोत्पत्तिनां
तरीयकदुःखाधिकदुःखाजनकत्वम्।बलवद्द्वेषविषयदुःखाजनकत्वंवेतिचेन्न।।इष्टसाधनत्वकृतिसाध्य

राम:
२१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयोर्युगपज्ज्ञातुमशक्यत्वात्। साध्यत्वसाधनत्वयोर्विरोधात्। असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वं
। न चैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते। तस्मात्कालभेदादुभयं ज्ञायत इति चैवम्। लाघवेन न
त्ववदतिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात्। न च साध्यत्वसाधनयोर्वि
रोधः यदाकदाचित्साध्यत्वसाधनयोरविरोधात्। एकदा साध्यत्वसाधनत्वयोर्ज्ञाज्ञानात्। नवीनाल्पु।
ममेदं कृतिसाध्यमिति ज्ञानमत्र प्रवर्तकं अनागते तस्य ज्ञातुमशक्यत्वात्। किंतु यादृशस्य पुंसः कृतिसा
ध्यं यदृष्टं तादृशत्वं स्वस्य प्रतिसंधाय प्रवर्तते तेन भोजनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः
पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसंधाय पाके प्रवर्तत इत्याहुः। तन्न सकल्पितलिप्यादिप्रवृत्तौ यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.
९२ वनेकामोऽङ्गवादिनासम्भोगादौचतदभावात्।इदन्तुबोध्यम्।इदानीमिष्टसाधनत्वादिज्ञानंप्रवर्तकन्तेनत
प्तोभोजनेनप्रवर्तते।तदानीमिष्टसाधनत्वाज्ञानात्एवंभाविद्योवराज्येबालस्यनप्रवृत्तिः।तदानींकृति
साध्यत्वाज्ञानात्।प्रवर्ततेचरोषदूषितचित्तोविषादिभक्षणेशिशुवधादौचतदानींबलवदनिष्टाननुबं
धित्व ज्ञानात्।नचास्तिकस्यागम्यागमनेशङ्खवधादिप्रवृत्तौचकथंबलवदनिष्टाननुबंधित्वबुद्धिर्नरक
साधनत्वज्ञानादितिवाच्यम्।उत्कटरागादिनानरकसाधनताधीतिरोधानात्।इत्थादौतुकृतिसाध्यता
ज्ञानाभावान्नचिकीर्षाप्रवृत्ती।किंत्विष्टसाधनताज्ञानादिच्छामात्रम्।कृतिश्चप्रवृत्तिरूपाबोध्या।तेन रामः
जीवनयोनियत्नसाध्येप्राणपंचकसंचारेनप्रवृत्तिः।इत्थंचप्रवर्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादि ९२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमर्थः। इत्थं च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते। नन्वहरहः संध्या
मुपासीतेत्यादौ इष्टानुपपत्तेः प्रवृत्तिः कथम्॥ न चार्थवादिकब्रह्मलोकादिः प्रत्यवायाभावो वा फलमि
ति वाच्यम्। तथा सति काम्यत्वेन नित्यत्वहान्यापत्तेः। कामनाभावेऽकरणापत्तेः। इत्थं च फलश्रुतिः तत्रा
र्थवादमात्रमिति चेन्न ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव [illegible] नित्य
त्वकाम्यत्वयोरप्यविरोधात्। न च कामनाभावेऽकरणापत्तिः। त्रिकालस्तवपाठादाविव कामनासद्भावस्यै
व कल्पनात्। ननु वेदबोधितकार्यताज्ञानात्प्रवृत्तिः सम्भवति स्वेष्टसाधनत्वमज्ञायता दृशकार्यताज्ञा
नसहस्रेणापि प्रवृत्तेरसम्भवात्। यदपि पंञापूर्वं फलमिति तर[illegible]पि ना कामनाभावेऽकरणापत्तेस्तो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनाऽनुत्पत्तिःप्रत्यवायस्यतथा
क्षेमस्थिते·१

मु:
२३
स्यात्।कामनाकल्पनेनार्थवादिकफलमेव।रात्रिसत्रन्यायात्कल्प्यताम्।अन्यथाप्रवृत्त्यनुपपत्तेः।ँ एवं सं
ध्यामुपासते ये तु सततं शंसितव्रताः।विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्।एवन्द्यादहरहः श्राद्धं
पितृभ्यः प्रीतिमावहन्नित्यादौ प्रीत्यात्मकमेव फलमस्तु न च पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति
वाच्यम्।गयाश्राद्धादौ विवोद्देश्यत्वसंबंधेनैव फलजनकत्वस्य क्वचित्कल्पनात्।अतएवोक्तं शास्त्रदर्शि
तफलमनुष्ठातरि इत्युत्सर्गे इति।पितॄणां मुक्तत्वे तु स्वस्य स्वर्गादिफलम्।यावज्जीवनैमित्तिकानुष्ठानस्य
सामान्यतः स्वर्गफलकत्वात्।परमपूर्वार्थं प्रवृत्तिश्च न सम्भवति न हि तत्सुखं दुःखाभाववत्स्वतः पुरुषा रामः
र्थो न वा तत्साधनम्।प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत्।इष्टं यथा हि निष्कृते प्रत्यवायाभावस्तिष्ठति २३
त्ये:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदभावे तदभाव एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योगक्षेमसाधारण
कारणता दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति। न
नु न कलंजं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थान्वयः इष्टसाधनताभावस्य बोधयितुमशक्यत्वादिति चे
न्न। तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबंधित्वमात्रं तदभाव
स्य नञा बोध्यते। अथवा बलवदनिष्टाननुबन्धी इष्टसाधनत्वे सति कृतिसाध्यत्वमात्रं विध्यर्थः। तदभाव
स्य नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति। ननु श्येनेनाभिचरन्यजे
तेत्यत्र कथं बलवदनिष्टाननुबन्धित्वं विध्यर्थः। श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰ धनत्वात्। नचवैधत्वान्ननिषेधइतिवाच्यम्। अभिचारेप्रायश्चित्तोपदेशात्। नचमरणानुकूलव्यापारमात्रं
२४ हिंसायदितदाखड्गकारस्यकूपकर्तुश्चहंतृत्वापत्तिः। गलल्लग्नान्नभक्षणजन्यमरणेआत्महन्तृत्वापत्तिश्चे
तिवाच्यम्। मरणोद्देश्यकत्वस्यापिविशेषणत्वात्। अन्योद्देशिकक्षिप्तनाराचहतब्राह्मणस्यतुवाचनिकं
प्रायश्चित्तमितिचेन्न। श्येनवारणायादृष्टाद्वारकत्वेनविशेषणात्। अतएवकाशीमरणाद्यर्थंकृतशिवपू
जादेरपिनहिंसात्वम्। नचसाक्षान्मरणजनकस्यैवहिंसात्वंश्येनस्तुनतथा। किन्तुतज्जन्यापूर्वमिति
वाच्यम्। खड्गघातेनब्राह्मणेव्रणपाकपरंपरयामृतेहिंसात्वानापत्तेः। केचित्तुश्येनस्यहिंसाफलंनतुम एमः
रणम्। तेनश्येनजन्यखड्गघातादिरूपाहिंसाभिचारपदार्थः। तस्यचपापजनकत्वम्। अतःश्येनस्यवै २४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भत्वात्पापाजनकत्वेपिअग्निमंपापंप्रतिसंधायसंतोनप्रवर्त्तंते।आचार्य्यास्तु।आप्ताभिप्रायोविध्यर्थः
पाकंकुर्य्यादित्यादावाज्ञादिरूपेच्छावाचित्ववल्लिङ्मात्रस्येच्छावाचित्वंलाघवात्।एवंचस्वर्गकामोय
जेतेत्यादौयागःस्वर्गकामकृतिसाध्यतयाआप्तेष्टइत्यर्थः।ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमा
यप्रवर्त्तंते।कलंजभक्षणादौतदभावान्नप्रवर्त्तंते।यत्तुवेदेपौरुषेयत्वंनाभ्युपैतितंप्रतिविधिरेवना
वरुभ्रेइवस्फतिकुमार्य्याःपुंयोगेमानं।नचकर्तृस्मरणंबाधकम्।कपिलकणादादिकमारभ्याद्यपर्य्य
न्तंकर्तृस्मरणस्यैवप्रतीयमानत्वात्।अन्यथास्मृतीनामप्यकर्तृकत्वापत्तेः।तत्रैवकर्तृस्मरणमस्तीतिचे
न्न।वेदेपिछंदांसिजज्ञिरेतस्मादित्यादिकर्तृस्मरणमस्त्येव।एवंप्रतिमन्वन्तरंवैश्याभ्युक्तिरन्याविधीयते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री

सु॰ २५ इत्येतद्दृश्यमा स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा। शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारका इति वेद
स्य स्मृतिमात्रम्। न च पौरुषेयत्वे भ्रमादिसम्भवात् प्रामाण्यं स्यादिति वाच्यम्। नित्यसर्वज्ञत्वेन निर्दोषत्वात्
मत एव पुरुषान्तरस्य भ्रमादिसम्भवान्न कपिलादिकर्तृत्वं वेदस्य किं च वर्णानामेवानित्यत्वस्य वक्ष्यमाणा
त्वात्सुतरां तत्समूहस्य वेदस्यानित्यत्वमिति। उपादानस्य चाध्यक्षं प्रत्यक्षं प्रवृत्तौ कारणमिति निवृत्ति
८५ रिति निवृत्तिस्तु भवेद्द्वेषाद् द्विष्टसाधनताधियः। द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्य
तिरेकाभ्यामवधारितमिति भावः। यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्। जीवनयोनिर्यत्नो यावज्जी ए.म॰ २५
वनमनुवर्त्तते स चातीन्द्रियः। तत्र प्रमाणमाह। शरीरे प्राणसंचारे कारणं तत्प्रकीर्तितं प्राणपंचकसंचारो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्यधिकभ्यासादिप्रयत्नसाध्यः इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात्स्वस्यपक्षयत्नबाधाच्चातीन्द्रि
यत्वसिद्धिः। स एव च जीवनयोनियत्नः। गुरुत्वं निरूपयति। अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत्। अ
नित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्। तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि॥ अनित्ये द्व्यणुकादौ
तद्गुरुत्वमनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यनुवर्तते। तद्गुरुत्वमसमवायि असमवायिकारणम्। प
तनेत्याद्यपतने इत्यर्थः। द्रवत्वं निरूपयति। सांसिद्धिकम् द्रवत्वं स्यान्नैमित्तिकमथापरम्। सांसिद्धिकन्तु
सलिले द्वितीयं क्षितितेजसोः। द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः। द्वितीयं नैमित्तिकं। परमाणौ
जले नित्यमन्यत्रानित्यमिष्यते। जलजपरमाणौ द्रवत्वं नित्यमन्यच्च पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
९९

द्रवत्वमनित्यम्। क्वचित्तेजसि क्वचित्पृथिव्यां नैमित्तिकं द्रवत्वम्। तत्र संकोचान्नैमित्तिकार्थं संदर्शयति
। नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु। द्रवत्वं स्यंदने। अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम्। तच्च सुवर्णा
दिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां च वर्तते इत्यर्थः। हेतुर्निमित्तं संग्रहे तु नतु। असमवायिकारणमित्य
र्थः। संग्रहे सक्तुकादिसंयोगविशेषे। ततद्रवत्वं स्नेहसहितमिति बोध्यम्। तेन द्रुतसुवर्णादीनां न संग्रहः। स्नेहं
निरूपयति। स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ जल इति जल एवेत्यर्थः। ननु पृथिव्यामपि तैले स्नेह
उपलभ्यते। न चासौ जलीयस्तथा सति दहनप्रातिकूल्यप्रसंगात्। अत आह तैलांतरे तत्प्रकर्षाद्दहनस्यानु रामः ९९
कूलता। तत्प्रकर्षात् स्नेहप्रकर्षात्। तैले उपलभ्यमानः स्नेहोपि जलीय एव। तस्य प्रकृष्टत्वादग्नेरानुकूल्यं। अप

हे १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग२

कृष्टस्तेहं जलं वह्निं विनाशयतीति भावः। संस्कारस्त्रिरूपस्तनि। संस्कारभेदो वेगोथ स्थितिस्थापकभावने॥
मूर्तमात्रे तु वेगः स्यात्। वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः। कर्मजो वेगजः क्वचित्। वे
गो द्विविध इत्यर्थः। शरीरादौ हि नोदनजनितेन कर्मणा वेगो जन्यते। तेन च पूर्वकर्मनाशस्तत उत्तरक
र्म एवमग्रेपि विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात्। पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात् यत्र वे
गवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः॥ स्थितिस्थापकसंस्कारः क्षितौ आकृष्टशाखादी
नां परि[illegible]त्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्। केचिच्चतुर्ष्वपि। अतीन्द्रियोसौ विज्ञेयः क्वचित्स्पं
दे पि कारणं चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यंते तदप्रमाणमिति भावः। तत् स्थितिस्थापकं क

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. ९८ चित।आकृष्टशाखादौ।भावनाख्यस्तुसंस्कारोजीववृत्तिरतीन्द्रियः।उपेक्षानात्मकस्तस्य निश्चयः।कार
णंभवेत्।तस्यसंस्कारस्य।उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मकमित्युक्तम्।नतुसंशयात्त
स्यानुत्पत्तेर्निश्चयइत्युक्तं।तेनोपेक्षान्यनिश्चयत्वेनसंस्कारंप्रतिहेतुनेतिभावः।ननुस्मरणंप्रतिउपेक्षा
न्यनिश्चयत्वेनहेतुत्वन्तेनोपेक्षास्थलेनस्मरणम्।इत्थंचसंस्कारंप्रतिज्ञानत्वेनैवहेतुतास्तितिचेन्नवि
निगमनाविरहेपिसंस्कारंप्रतिउपेक्षान्यनिश्चयत्वेनहेतुतायाःसिद्धत्वात्।किंचउपेक्षास्थलेसंस्कारक
ल्पनायांगुरुत्वात्।संस्कारंप्रत्युपेक्षान्यनिश्चयत्वेनहेतुतायाःसिद्धत्वात।नत्रप्रमाणंदर्शयति।स्मरणेप्रत्य मुमुः ९८
भिज्ञायामप्यसौहेतुरुच्यते।यतोऽसौसंस्कारःस्मरणंप्रत्यभिज्ञांचजनयत्यतःसंस्कारःकल्प्यते।विनाव्यापारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वानुभवस्यस्मरणादिजननासामर्थ्यातस्वस्वव्यापारान्यतराभावेकारणत्वासंभवात्।नचप्रत्यभिज्ञां
प्रतितत्संस्कारजन्यत्वेनस्मृतित्वापत्तिरितिवाच्यम्।अप्रयोजकत्वात्।परेतुअनुद्बुद्धसंस्कारात्प्रत्यभि
ज्ञानुदयादुद्बुद्धस्यहेतुत्वापेक्षयातत्तत्स्मरणस्यैवप्रत्यभिज्ञांप्रतिहेतुत्वंकल्प्यतइत्याहुः।अदृष्टंनिरूपय
तिधर्माधर्मावदृष्टंस्यात्।धर्मःस्वर्गादिसाधनम्।गंगास्नानादि।स्वर्गादिसकलसुखानांस्वर्गसाधनीभूत
शरीरादीनांचसाधनंधर्मइत्यर्थः।तत्रप्रमाणंदर्शयितुमाह।यागादिव्यापारःसतुकीर्तितः।यागादि
व्यापारतयाहिधर्मःकल्प्यते।अन्यथायागादीनांचिरविनष्टतयानिर्व्यापारतयाचकालांतरभाविस्वर्ग
जनकत्वंनस्यात्।नचनिर्व्यापारस्यचिरध्वस्तस्यकथंकारणत्वमितिवाच्यम्।अनन्यथासिद्धनियतपूर्वव

नतुयागध्वंसएवव्यापारःस्यात्।नचप्रतियोगिध्वंसयोरेकत्रजनकत्वं।सर्वत्रतथात्वेमानाभावात्।नचफलमनित्यांसंमतेचरमफलस्ये
वापूर्वंभावकत्वादितिवाच्यं।समयविशेषस्यापिसहकारित्वात्।अत्रआह।गंगास्नानेति।गंगास्नानस्यहिस्वर्गजनकत्वेतुनंतरजनकसंयो
गध्वंसानांव्यापारत्वमपेक्ष्यैकमपूर्वंकल्प्यतेलाघवादितिभावः।ननुध्वंसोपिसास्तुव्यापारः॥१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अधर्मोनरकादीनांहेतुर्निंदितकर्मजः॥अधर्मेति।५

मु ९८ नित्वस्यचत्रापिसत्वात्अव्यवहितपूर्ववर्तित्वंहिचक्षुःसंयोगादेःकारणत्वेदेयंननुसर्वत्रकार्य्यकालवर्ति
त्वमिवसमवायिकारणस्यकारणत्वेइत्यतआह।कर्मनाशाजलस्पर्शादिनानाश्यत्वसौमतः।अधर्मोय
दिह्यपूर्वंनस्यात्तदाकर्मनाशाजलस्पर्शादिनानाश्यत्वंधर्मस्यनस्यात्।नहितेनयागादेर्नाशःप्रतिवंधो
वाकर्तुंशक्यते।तस्यपूर्वमेवनिवृत्तत्वादिति।नरकादिसकलदुःखानांनारकिशरीरादीनांचसाधनमध
र्मइत्यर्थः।तत्रप्रमाणमाह।प्रायश्चित्तादिनाश्योसौजीववृत्तीत्विमौगुणौ।यदिह्यधर्मोनस्यात्तदाप्रायश्चि
त्तादिनाश्यत्वंनस्यात्।नहितेनब्रह्महननादेर्नाशःप्रतिवंधोवाकर्तुंशक्यते।तस्यपूर्वंविनष्टत्वादितिभावः राम: ९८
जीवेति।ईश्वरस्यधर्माधर्माभावादितिभावः।इमौधर्माधर्मौ।इमौतुवासनाजन्यौज्ञानादपिविनश्यतः।अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोज्ञानिनाकृतेपिसुकृतदुःकृतेकर्मणीनफलायालमितिभावः।ज्ञानादपीत्यपिनाभोगपरिग्रहः।ननु
तत्वज्ञानस्यकथंधर्माधर्मनाशकत्वंनाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपीतिवचनविरोधात्।इत्थंच
कु५ तत्वज्ञानिनांझटितिकायव्यूहेनभोगेनसकलकर्मणांक्षयइतिचेन्न।तत्रभोगस्यवेदबोधितनाशकोप
लक्षणत्वात्।कथमन्यथाप्रायश्चित्तादिनाकर्मणांनाशः।तदुक्तम्।ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुते
तथेति।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइतिच।ननुतत्वज्ञानिनस्तर्हिशरीरावस्थानंसुखदुः
खादिचनस्यात्।ज्ञानेनसर्वेषांकर्मणांनाशादितिचेन्न।प्रारब्धेतरकर्मणामेवनाशात्।तच्छरीरेभोग
जनकंहियत्कर्मतत्प्रारब्धंतदभिप्रायमेवनाभुक्तमित्यादिवचनमिति।शाब्दंनिरूपयतिशब्दोध्व(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ २९ निश्चवर्णाश्चमृदंगादिभवोध्वनिः। कण्ठसंयोगादिजन्मावर्णास्तेकादयोमताः। सर्वःशब्दोनभोवृत्तिः। नभो
वृत्तिः। आकाशसमवेतः। दूरस्थशब्दस्याग्रहणादाह। श्रोत्रोत्पन्नस्तुगृह्यते। ननुमृदंगाद्यवच्छेदेनोत्पन्नेश
ब्दे श्रोत्रे कथंतदुत्पत्तिरित्यतआह वीचीतरंगन्यायेनतदुत्पत्तिस्तुकीर्तिता। आद्यशब्दस्यबहिर्देशादिगव
च्छिन्नोयःशब्दस्तेनैवशब्देनोत्पाद्यतेनचापरस्मात्॥ एवंक्रमेणश्रोत्रोत्पन्नउपलभ्यतइति। कदम्बगोलक
न्यायादुत्पत्तिःकस्यचिन्मते। आदिश[ब्]दाद्दशदिक्षुदशशब्दाउत्पद्यन्तेतेभ्यश्चान्येदशशब्दाउत्पाद्यन्तेइतिभा
वः। अस्मिन्कल्पनेगौरवादुक्तंकस्यचिन्मतइति। ननुशब्दस्यनित्यत्वात्उत्पत्तिःकथंसंगच्छतेइत्यतआह। भा॰प॰
उत्पन्नःकोविनष्टःकइतिबुद्धेरनित्यता। शब्दानामुत्पत्तिविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः। ननु २९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मु. स एवायंककार इत्यादिप्रत्यभिज्ञानात्कृद्यानां नित्यत्वं। इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह। सो
१०० यं क इति बुद्धिस्तु साजात्यमवलंबते॥ तदेवौषधमित्यादौ सजातीयेपि दर्शनात्॥ तत्र हि प्रत्यभिज्ञानस्य
तत्सजातीयं विषयो न तु तद्व्यक्त्यभेदो विषय उक्तप्रतीतिविरोधात्। इत्थं च द्वयोरपि बुद्ध्योर्न भ्रमत्वमि
ति ननु सजातीये सोयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह। तदेवेति। यदौषधं मया कृतं तदेवौषधमन्ये
नापि कृतमित्यादिदर्शनादिति भावः॥ ॥ इति श्रीमन्महोपाध्यायसिद्धान्तपंचाननभट्टाचार्य्य
कृता सिद्धान्तमुक्तावली समाप्ता॥ ॥ राम: १०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वतन्त्रा भेयाद्धतपदार्थतावच्छेदकव्याप्यांमिथो विरुद्धयावद्धर्म प्रकारक बोधनम् =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu